९३
२०

93
20

अथ

ग्रन्थनामः-	"कठवल्लीविवरणम्"
कर्तृनामः-	'श्रीकृष्णानन्दसरस्वती'
विषयः-	'अद्वैतवेदान्त'

Katavalli Vivaranam.
Sri Krushnanandha Saraswathi
Adytham vedhana.

। अथ

"कठवल्लीविवरणम्"

धाम्यं सूचयितुं जातिपरपदयोर्विशेषणत्वेनादरणमिति विवेचनीयं। अथ मृत्युवाक्यस्य ब्रह्मक्षत्रवाक्यात् पुरस्करणं किंनिमित्त
कमिति चेत् मृत्योरोदनभक्षणसाधनत्वात् तद्विशेषप्रयुक्तं पूर्वकरणं किं च ब्रह्मक्षत्रयोरेकौदनविधेयकत्वान्मृत्योश्चोपसे
चनविधेयकत्वादुद्देश्यविधेययोर्विभिन्नत्वेन वाक्यभेदेन विरचनमर्थभेदप्रयुक्तमिति विज्ञेयं। अथ ब्राह्मणः क्षत्रियश्चेत्य
नुक्त्वा ब्रह्म क्षत्रे चेति नपुंसकलिंगेन सामान्यपरेण निर्देशः किमापन्न इति चेत् सामान्यलिंगप्रयोगसामर्थ्येन ब्रह्मक्षत्र
जातेरेवाभ्यर्हितताया आप्रलयमनश्वरतयौदनत्वव्यक्तीनामल्पकालस्थितिकानामोदनत्वे कैमुतिकन्यायसिद्धमि
ति सूच्यत इति सर्वमवदातं इति श्रीमत्परमहंसपरिव्राजकाभिनवशंकराचार्यस्वयंप्रकाशश्रुतिनगरनाथबालकृ
ष्णानन्दसरस्वतीकृते कठवल्लीविवरणे तृतीयपरिच्छेदे द्वितीया वल्ली समाप्ता॥ अन्तरात्मानाविति प्रकरणोपदिष्टं परं परमथा
हं ज्ञेयं जीवप्रायोपूर्वप्रस्तावात् आत्मानमिसुन्तरायं प्रपिविस्पष्टकथनाच्च। अत्रापि बंता विति निर्देशात् इस वदृष्टं जलप्राय मि
ति सूच्यते। यत्किंचिदिति संदेहमारकत्वनिद्रालुत्वप्रसन्नत्वादिविचित्रलिंगेन प्रकाशमानेन गुहाप्रवेशात् पादिनिर्देशा
न पत्त्वविज्ञानवान् यस्तु विज्ञानवान् विज्ञानसारथिरित्यादिनिर्देशेन द्वितीयवल्ल्यां धातुप्रसादान्नाविरत इत्यादिनिर्देशा

"श्रीकृष्णानन्दसरस्वतीविरचितम्"

नचमारकंभसारकमुभयात्मकंचरसद्वयमितिनिर्णयार्थं जीवेशलक्षणौ ऋतंकर्मफलंक्षणामारकंपरिणामरूपंरसंसुकृतस्यलो
केस्वर्गादिलक्षणेपिबंतौसंतौमस्पारवप्पारवशौ विवेकविधुरौ अतएवनिद्रालूरयहंनिद्रानुकूलांमधकारबहुलांप्रवि
ष्टौभवतः क्वपिबंतौगुहाप्रवेशिनाविल्याकांक्षापूरकंसुकृतस्यलोकइतिपदं सुकृतस्यस्वकर्मणः लोकेपितृगंधर्वरा
घुधिष्ठितेलोके इतियावत् अत्रसुकृतस्यलोके ऋतंपिबंताविति निर्देशस्यमुचितत्वव्यत्ययेननिर्देशोल्लोकानांगणनाम
पिकृतपानाधिकरणत्वमस्तीतिसूचयति तेनमानुषोपिलोकोनरकादिष्वकृतपानाधिकरणत्वेनपरिगृहीतोभवत
पथ्याच्छायास्थौपरार्द्धौ किंचित्प्रकाशमानाप्रकाशमानावातपस्थापेक्षयाभवतस्तथापरमेलोके ब्रह्मलोकाधःप्रदेशोज्ञा
त्मानौभवतइतिभावः एवमेवात्मानौपरार्द्धेग्न्युत्कृष्टेलोके ब्रह्मलोकोर्ध्वप्रदेशे ऋतमुपासनापरोक्षज्ञानादिफललक्ष
णापीयूषरसंप्रसारकंपिबंतौसंतौसलोडकारतिविद्यारावानपो आतपस्थाविद्यातिप्रकाशमानौभवतः तत्रसत्त्वस्यैव
प्राधान्यात् तत्रब्रह्मलोकोर्ध्वप्रदेशप्राप्त्याब्रह्मविदः ब्रह्मज्ञानवंतः परोक्षब्रह्मज्ञानस्योपासनारस्य कृतंफललक्षणं राम०
रसवद्रूपवद्रूपंपिबंतौसंतौ आतपावनुभवसत्वानवदंतित्रिणाचिकेतात्रीणिनाचिकेतान्युपासनरूपमेकंकर्मानुष्ठानंचे ४५

तिर्यग्योनितदनुष्ठानेन ब्रह्मलोकाधःप्रदेशगमनात्तेषामनुभवसत्वात् आत्मानौ कृतमुपासनासंवलितकर्मफलं लक्षणार
सर्वदृश्यं पिबंतौ संतौ छाया आश्रापे छायारूपौ वदंति पंचाग्नयः गार्हपत्याहवनीयदक्षिणाग्निसभ्यावसथ्याः पंचाग्नयो येषां
ते पंचाग्नयः कर्मणा श्रौतस्मार्तेकर्मपराः पित्र्याणेन स्वर्गादिलोके गंतारः अनुभवसत्वादात्मानौ कृतं सुकृतफलं लक्ष
णा रसवदृश्यं पिबंतौ संतौ गुहां प्रविष्टौ वर्त्तेते इत्यन्वयक्रमः अत्रानुभवकर्तृत्वेन याणो ब्रह्मविन्स्वेच्याग्निचिताणाचिकेतानां
निर्देशात् लोकत्रयनिर्देशाच्च गुहांप्रवेशाच्छायारूपत्वात् परूपत्वरूपाद्वयोऽर्थाः क्रमेण निर्दिष्टा इति निर्णीयं । किंच ब्रह्मलो
कवदेवमनुष्यलोकेपि जीवेश्वरयोर्भानमस्ति विस्पष्टं प्रत्युत ब्रह्मलोके आतपस्थस्य जीवेश्वरभानकथनात्तत्रैव बहुकाल
पर्यंतं दर्शने आतपकृतदृष्टिप्रतिबंधेन तेषु विषयस्याभानमपि संभावितं आतपपदस्वारस्यात् तपःक्लेशसंतापाद्वा विषयप्रदर्श
ने भावनीयं भवति मनुष्यलोके तु आदर्शे मुखदर्शनमिव जीवेशदर्शनं भवतीति कथनात् दृष्टिप्रतिरोधसंभावना क्लेशासंभा
वनाच्च नास्त्येव यावदिच्छं च शीतलेन च क्षुषा प्रतिबिंबस्यादर्शदर्शकानुभववत् जीवेशयोरनुभवो भवतीति ब्रह्मविदः सप्र
थमपाठेन सूचितं भवति एवं मनुष्यलोके विषयव्याक्षेपस्याप्यभावात् सत्वरं ज्ञानमुदेत्येव ब्रह्मलोके चिंतितमात्रेण विषय

कु०भा०
४६

सन्निधानात्सलक्षणाद्यन्यपि कदाचिद्दिग्भ्रमवशाज्ज्ञानप्रतिबंधोपि संभावितः नैवं मानुषे लोके। अतो कृतमिति मनोरिह चेदिति मंत्र
स्यन ह्यालस्य च समानार्थतया निरूढशक्त्येष्टव्यत्वेन प्रागुक्तमेव योजनं रमणीयमिति विभावनीयं। एवं स्तुतस्तु सतं स्वगता
वितिधातोः कर्तरिक्तरूपमिदं व्यापकार्थकं पदं। कृतं सत्यं कालत्रयाबाध्यं। अखंडार्थरूपं अत्र कृतमिति विषयस्य विषयिप
रपराश्रवणात् चतुर्थवल्यां कृतमंत्रव्याख्याने पइमंमधुरमितिमंत्रे मधुपदस्य ग्रहणात् कृतमंत्रपूर्वमनोर्थं स स्वव्याख्याने
षष्ठवल्लीगतेपरिहरकेचेतिमनोवेदवेन फलत्वेनाखंडार्थस्यामृतपदेन निर्देशः एवं कमृतमेषामित्यस्याघं जंतत्वेन य
एवं विदुरमृतास्ते भवंतीति निर्देशात् इदं तं मधु कृतममृतमितिवा पूरणीनयोजनीयं षष्ठवल्यां कृतमंत्रव्याख्याने इह चेदश
कदिति मंत्रे इहेति परोपासना इतमत्रेपि इहेति प्ररणीयं। एवमिह चेदशकद्वोदुमिति व्यतिरेकनिर्देशसामर्थ्यादिहस्मा
नुबोधश्चेदित्यर्थो लिब्धं भवति एवं च पिबंताविति पदं पानकर्तृपरमपि घटयितव्यं धातुर्घटनालाक्षणिकः बोधश्चेन्मा
नुषेस्मिन्लोके तर्हि जीवे शोसशोधनं ह्यांगस्याधिष्ठानं चैतन्यमाश्रित्य महांखंडार्थ घटकौ तत्पर्ये वृषाप्यिनो ज्ञातु राम०
दृशाववेदति। इह चेत्स्वदेहे दृष्यसत्यमस्तीति श्रुमेत्तरावइह मानुषेलोके बोधो न भवति चेत् तर्हि सुकृतस्य लोके सुकृते ना ४६

र्जिते पितृगंधर्वादिलोके तौ जीवेशौ नियम्यनियामकभावेनास्थितौ गुहां प्रविष्टौ वदंति लोके गुहामंधकारबहुलां प्रविष्टौ
द्वौ पदार्थौ तमोबाहुल्येनाप्रकाशमानौ तावेव जीवेशौ वदंति। अप्रकाशमानौ वदंति। विषयरजोगुणादिपारवश्येन तत्त्वाना
प्रादुर्भावेना खंडार्थौ घटकौ वदंति। परमे प्राजापत्ये लोके छाया छायातपौ छायातपस्य पदार्थौ वव केवलं साधारण्येन प्र
काशमानौ वदंति पदार्थौ लोके आतपो आतपस्य पदार्थौ वदंति प्रकाशमानौ वदंति ननु महाखंडार्थे घटकौ वदंति न चेदि
हावेदीन्महती विनष्टिरिति श्रुतेस्तत्राह इह चेदशकद्बोद्धुं प्राक्शरीरस्य विस्रसः॥ ततः सर्गेषु लोकेषु शरीरत्वाय कल्पते इ
ति रूतमेतद्व्याख्यानमेतत्रात यथादर्शे तथात्मनि यथा स्वप्ने तथा पितृलोके यथाप्सु परीव ददृशे तथा गंधर्वलोके छाया
तपयोरिव ब्रह्मलोके इति रूतमेतद्व्याख्यानभूते हमेत्रैकवाक्यतापरब्रह्मणश्चेति दिक्॥ सकलकर्मसमाप्तिरूपं नाचिके
तेन चिकेतसाहं अक्षरं न क्षरतीत्यक्षरं नाशरहितं ब्रह्म यत् न भवति तद्ब्रह्मप्रति शकेमसि शकेमहि ष्वक्तुमः ज्ञातुं तत्समर्थाभ
वाम इत्यर्थः ईशानिरूपणपूर्वकं तदधिष्ठानशुद्धस्वरूपं जीवप्राप्यवस्तुमिति भावः एतेनात्रा खंडार्थौ ज्ञापितो भवति। अत्रा
पेक्षितस्यापि तत्सरस्याप्यपाठः श्रुतरूपरवाच्यं न भवति किंतु कथं विज्ञापनीयमिति सूचनायेति वेदितव्यं। यद्वा एतौ नियन्तृ स

कं॰भा॰ ४७

वोनुगतमित्यर्थः एवं च नकाप्यनुपपत्तिरिति भावः ॥ अथ यमो नचितसंप्रतिरथ्यरूपकेणविद्याधिकारिणामनधिकारिणां चद
शेयन्नविशिष्टाधिकारिणो विद्याधिगमद्वारा मुक्तिमितरस्या मुक्तिं शोधितजीवेशस्वरूपं विद्यासाधनं चैकारश्राभिर्मु
नुभिरात्मानमित्यादिभिर्दर्शयतिस्म। तत्र साधनमनुना रूपकं मारशयत आत्मानमिति। अत्र पूर्वार्धे नेनु कारः उत्तरा
र्द्धेतिचकारस्थपठ्येते तदेतदसंगतंनुकारस्योद्देश्यपदाद्वपूर्वं प्रस्तुताद्भिलक्षणार्थविधानापानिर्दिष्टमुचितत्वात् तुः स्या
द्भेदेऽवधारणे इतिकोशात् विधेयभेदावधारणात्तन्वुपेन विधेयोत्तरं तु निर्देशायोगात् एवं मनइतिपाठान्ते चकार एवकारे
तरसमनन्वय्यप्येव एवकारेणेतरव्यावृत्तौ समुच्चयपरचकारायोगात् प्रसिद्धिपरतया हि कारपर्यायत्वेन च कारप्रयोगोनोपपद्य
ताल्लकारान्तरे हेः प्रयोगेपि विधिलकाराद्धिकारायोगात् / विधेरपूर्वार्थविधायकत्वात् हेः प्रसिद्धिपरत्वात् अज्ञातज्ञातत्व
योः परस्परविरोधात् इह च विद्धीति लोडिन्निर्देशेन विधेजोगरूकत्वात् किंचैवकारावष्यसंगतौ रथ्यसारथ्योरेवकाराश्रवणा
नंतलक्रमे एवकारपाठेनवैरूप्यापत्तेः प्रथमतृतीयपादयोरात्तानार्थपरतान्द्वितीयचतुर्थपादयोरात्तानार्थपरत्वेनेतरव्या एप॰
वृत्तिपरतेनिसमाने प्रकरणे क्वचिद्रूपकस्य सिद्धतयान्यव्यावृत्तिपरतेति क्वचित्सिद्धत्वेन रूपकस्य ज्ञापनमिति निरूपणीयत्वात् ४७

तस्मादिदं कथमुपपादनीयमिति चेन्न तु हि च स्म ह वै पादपूरणे पूजने स्वतीति निर्देशादिहनुकारश्चकारो पादपूरणाय प्रयुक्तो
नन्वयो वोच्या घ्यो ऽस्ति पादपूरणे न च तथा पाठाद् दृष्टेर् ये मंत्ररूपत्वादिति केचित् तदेतदसंगतं। केवलजपमंत्रत्वाभावात्
दुःफडादिवत्। अर्थावबोधार्थमेवास्य प्रकरणस्य प्रवृत्तित्वेन तत्र निरर्थकाक्षरविन्यासस्यानुचितत्वात्। एवं चात्रपा
ठितेश्रूयमाणस्तु शब्दः शरीरमित्यत्र शरीरं त्विति योजनीयः। तत्र मनश्चेति चकारोऽनुक्तमहंकारमंतःकरणत्वेन मतांतर
सिद्धं स्वमतेप्यंतःकरणविभागरूपत्वेन प्रसिद्धं समुच्चिनोति एवमेव कारोपि न्यासंगतः आत्मानमित्यादेः केवलाज्ञातज्ञा
पकत्वाभावात्। अग्रे इंद्रियाणि हयानाहुरिति निर्देशेन लोकप्रसिद्धेर्घोतनात्। अथेंद्रियादिस्थले प्रक्रांतवि
द्रूपदेनैव निर्वाहसंभवात् सर्वत्र लोकप्रसिद्धेरपि द्योतयितुं प्रकृतत्वात् तद्रूपेष्विति पाठो विषये ष्विति पदानुषंग इति प्रक्रांत
शिरस्यैव प्राधान्यात्प्राधान्योपपत्तेः उ हु रिति क्रियांतरस्यानुपस्थितस्य स्वीकरणं प्रक्रमभंजकत्वपाये रूप्याध्याकर्षं किं निबंधनं अ म
स्वविषयपोस्तु कारणपाठो गि किंनिबंधन इति चेन्न अस्य विषययोर्विद्धीत्यस्य पाठोनादरस्य सूचनाय। आत्मानमित्यादेरप्या
दिपरिकल्पनं परकृतमपि विद्धीतिपाठेन स्वसंमतमित्यादरस्याप्यद्देश्यापरिकल्पनयोः परकृतयोर्विद्धीत्यपाठेन स्वासंमत

त्वमिसनादरस्य च द्योतनसंभवात्। अथ यथा स्यादिकल्पनायामनादरे किं निमित्तमिति चेत् परेतावदिन्द्रियाणि प्राग्विषयदेशाद्
तिवर्द्धतितन्न्यातिरमणीयं। इन्द्रियाणि विषयदेशगमनेन क्रियावत्वात् स्थूलत्वं विषयाणां स्थिरत्वात् केवलं देशत्वमिति किल स्वी
क्रियते। इत्थं कल्पनाद्वयमपि वक्ष्यमाणसंसारपातापातानुपयोगाद् उपेक्षणीयमेव। उपेक्षायां इन्द्रियाणां विषयेषु संचा
रे बाधकाभावात् विषयाणां निरुक्तरीत्या भोगसान्निध्यालाभात् भोगाभोगयोरेव संसारपातापातनियामकत्वात्
अतो न विषयाश्रयाद् इन्द्रियाणि देश इति विपरीतकल्पनमेव समुचितं भवति विषयाणामिन्द्रियपरिणामेषु स्वीया
कारसमर्पकत्वाभ्युपगमेन बुध्यंतं संचरणस्वीकारात् विषयाणां क्रियावत्वेन अस्थूलत्वकल्पनायां इन्द्रियाणां देशत्वक
ल्पनायां च संभवात्। आंतरविषयस्यैव संसारजनकत्वात् बाह्यविषयस्य संसाराहेतुत्वात् मनसा बुध्या च विषया
स्या इन्द्रियदेशे यथा न संपतितत्या कर्त्तुं शक्यत्वात्। आसक्त्यैव विषयस्येन्द्रियेषु प्रसर्पणात्। आसक्तेरभावे चोपेक्षास्थ
ले चक्षुरादीन्द्रियसन्निकृष्टेऽपि विषये मनसोऽन्यत्रासक्तौ च चक्षुरादीन्द्रिये विषयाकारा मदृष्टेन्ने स्तद्वासनाया उत्तरकाले
अभावात्। अन्यत्रमना अभूवं नादर्शनाश्रौषमिति श्रुतेः। तथा च समसे तर्थमेवेन्द्रियार्थयोस्तु कारापाठोऽपि स्वदृत्तस्तु प्रपष

तीत्युक्ते ऽन्योन्यप्रसक्तौ सवधारणाप्रसक्तपरिहारायेन्द्रियाणि तु हयानाहुरित्युक्ते ऽस्मान्नर्थान्नश्वान्नाहुरिति विषयव्यावृत्तिः सि
द्धेत् विषयानपि केचनाश्वानाहुरिति तु त्तापनीपमित्युपपादनीयत्वात्। अथ तेषां गोचरानिति विस्पष्टनिर्देशा
संभवान्नेक्षितिक्लिष्टकथनमसंगतं किंच तेषामित्यनुक्त्वापि गोचरानित्येतावन्मात्रे कथिते प्यश्वानामेव देशा इत्य
श्वपदसमभिव्याहारेणासिध्यति। पूर्वं रथादिस्थलेपि परस्परसंबंधबोधकपदापाठान्नत्र समभिव्याहारादेरेवनि
यामकतयावश्याभ्युपेयत्वादेवं चेह विशिष्य पठनमनर्थकमेवेति चेत् देशाश्वव्यत्यये दर्शयितुमेवाधिकं पदं स
न्मयं तं प्रस्तुतार्थानुगुण्येन तत्सम्पन्नया निर्वहणीयं पठितं। तेष्विंद्रियेष्वित्यनेनाधिकरणप्राप्तं बोधयता पदेनें
द्रियेषु विषयाः संचरंतीति स्मारणेन विपरीतार्थद्योतनेनोपपत्तेः अथात्मानं रथिनमित्यत्रोपात्तमात्मस्वरूपं प
रिशोधयितुं दर्शयति आत्मेति मनीषिणः विद्वांसः इंद्रियमनोयुक्तं पथ्यास्यान्तत्पा भोक्ता आत्मा भवतीत्याहुरि
त्यन्वयः यद्वात्मानमित्यत्रोपात्तस्यात्मनो गुणकं च न परिशोधनाय दर्शयति आत्मेति मनीषिणः आत्मा इंद्रि
यमनोयुक्तं पथ्यास्यात्तथा भोक्ता भवतीत्याहुरित्यन्वयः अथवा मनीषिणः आत्मेंद्रियमनोयुक्तं आत्मनो दे

रू॰ भा॰ ४९

हेनेंद्रियैश्च स्थूलशरीरेण मनसा च युक्तं विशिष्टमात्मानमयं भोक्ता भवतीत्याहुरित्यन्वयः अत्र प्रथमव्याख्याने भोक्तोद्देश्यः आ
त्मा विधेयः द्वितीयव्याख्याने आत्मोद्देश्यः भोक्ता विधेयः तृतीयव्याख्याने प्रकरणादात्मानमिति द्वितीयांतपदमात्मेंद्रि
यमनोयुक्तमिति द्वितीयांतपदविशेष्यत्वेन प्रकरणसामर्थ्याद्योग्यतयाऽध्याह्रियते अत्रेंद्रियमनोयुक्तमिति पद
मात्मानमित्यस्य द्वितीयांतस्य पुंल्लिंगविशेषणं एवं च प्रथमव्याख्याने विधेयस्यात्मेति पदस्य पश्चान्निर्देशाद्धेत्वपरिदृश्य
मानः प्रथमनिर्देशोऽसंगत एव भवेत् जाग्रदवस्थस्यैवात्मत्वं चोपवर्णितं स्यात् न तु स्वप्नसुषुप्त्यवस्थापन्नयोस्तैज
सप्राज्ञयोरपि तच्चोपयुक्तं तत्राप्यात्मत्वस्य निरूपणीयत्वात् अवस्थात्रयानुस्यूतत्वेनात्मनः सकलप्रमाणसिद्धत्वा
त् द्वितीयव्याख्याने जाग्रदवस्थायामेव भोक्तृत्वमुपवर्णितं स्यात् न स्वप्नेपि तथा च न्यूनता स्यात् तृतीयव्याख्याने स्व
प्नावस्थात्मनि विद्यमानं भोक्तृत्वं नोक्तं स्यादिति न्यूनतैव किं च प्रकरणादात्मानमित्यध्याहारात् अध्याहार एव दोषः स्या
त् अनध्याहारेणोपपन्नावध्याहारस्यानुचितत्वात् देहमुक्तमित्युक्ते सुषुप्तावपि विषयभोक्तृत्वापत्तिः इंद्रियमनोयु राम॰
क्तमिति सेनावति कथिते स्थूलदेहाभावदशायामपि भोक्तृत्वं स्यात् देहमनोयुक्तमित्येतावति न क्वाप्यप्रसंगोऽतिप्रसंगो ४९

सान्न हमनोवात्रत्र हृदूताप्रभावे रूपादिज्ञानाभावात् ॥ अतोच्यते ॥ मेत्यपरिश्रमासंभवं कामकर्मी विद्या वसनानात्प लेत्रां ॥ तथा चेतिग्रति त्रयाणां
व प्रेद्रुपः स्वयंत्रेवे वा नाम्नायाः ते भवात् ॥

तिप्रेप्सेर्गो वा भवति। सुषुप्त्यवस्थायां स्वानेष्टभुक्तत्वेन विषयानेष्टभुक्त्वाभावात् विषयभोक्तृतायाः एवेह भोक्तृपदेन परिग्रहात् प्रति
पद्यप्यात्माभोक्तेत्येवालं तथापि भोक्तृत्वस्वाभाविकमित्येव भ्रमः स्यात् तद्वारणाय इयमनो युक्तमित्युपात्तं एवं च भोक्तृ
त्वमौपाधिकं न स्वाभाविकमिति द्योतितं भवति। अथ पल्वितित्नु परस्कथ संगतार्थ रेवस्त्रं पचति क्रमप्रु रत्नस्तु क्रस्मीमा
स्ते इत्यादौ सजातीयपूर्वप्रस्तुतेसतिपश्चात्तत्सजातीयपदार्थान्तरे वैलक्षण्ये विधेये विशेषणत्वेन द्योतनीये प्रसक्ते सति
तत्र पूर्वस्मादन्यदपि अनुप्रयुज्यमानं दृष्टं प्रकृते तु पूर्वत्र नादृशवस्तुप्रस्तावाभावादितएवप्रवृत्तिनिवृत्तिमार्गभेदारंभा
त् अत्र तस्तु परम संगतमेव भवेदिति चेन्न। तुःस्यादेरेवधारणे इति स्मरणात् भेदोपासेरवा धारणे एवधारणपर एवायं तु रितिनि
र्णीयते यस्तु एवे सर्थः। क्रियातः पूर्वमयुक्तेन मनसा सदेकस्य पाठे समुचितेसति पश्चात्पाठोयमन्येषामप्युक्तानामिं
द्रियाणामन्वयाय युक्तैरिंद्रियैरयुक्तेन मनसा चेति। अत्रामुचितत्वं द्रष्टुर्वासना कर्मादिभिरिद्विलप्यध्याहार्ये उत्तर त्राप्युचितत्वमु
चितत्वयोरुल्लेखनेहाप्यनुचितानां संपादकपदार्थाकांक्षासत्वेन तदध्याहारे विसानाः एवंच सदाप्ययुक्तत्वोक्त्या कदाचिदपियु
क्तमनाविज्ञानादिमांश्च ज्ञानो भवतितर्हि तस्येंद्रियाणि वश्यानि भवंतीति सिद्धं चित्तं भवति। अथ प्रयोगमार्गविरुद्धनिवृत्तिमा

कु०भा० ५० गोर्हि पुरुषं दर्शयति पश्चिमाभिर्नाष्टकेन मनुना। अत्र तु शब्दः पूर्वस्मात् प्रकृतिमार्गोपराज्जनाडेहकएवनत्वधारणापरः इ
वेमनावधारणे नैतस्य आवर्त्तितत्वेन व्यावर्त्तितावधारणानिर्देशानौचित्यात्। अथ प्रेयः श्रेयोमार्गप्रवृत्तयोः प्राकृ
फलवैलक्षण्यकथनात् मोक्षसाधनीभूतार्थानुवादपूर्वकं फलद्वयं क्रमेण दर्शयति पश्चिमाभ्यां मन्त्राभ्यां। अन्वाचष्टे
पक्रियाभेदादिति वेदितव्यं। अथ परं तस्य इदं किं परं किंरूपं किं सर्वनाम किं वोत्तस्य इति निर्देशो ब्रह्मणो द्विविधः स्यात् इति
ब्रह्मशङ्कोपस्थितिरुक्तमिति पठितव्यं व्यवहिते मन्त्रे समुपात्तस्य परामर्शे उत्तमानाभावात्। अतस्तावदिदं तस्येदं ब्रह्मशक्तमे
वोत्तस्य इति प्रमाणसिद्धमिह परिग्राह्यं· तथा च तदिति तत्पदपरामृष्टस्य विशिष्टब्रह्मणः पदं शुद्धमिति योजनीयं। अ
थ तच्च तत्पदं चेति कर्मधारयः कुतो न भवतीति चेत् न विशिष्टस्य शुद्धाभेदायोगात्। अथ तस्य इदं शुद्धलाक्षणिकं सत्
कर्मधारयं समर्पयत्विति चेत् न उत्तरत्रैतन्मन्त्रार्थोपसंहारे विष्णोः परमं पदमिति षष्ठ्या एव स्पष्टत्वात्। पूर्वमपि यत्र स
इत्यत्र पत्रेति पदे न शाधिकरणताया एव स्पष्टमुक्तेः पदमिति परस्य संबन्धिशब्दत्वेन कस्येत्याकाङ्क्षोत्थानेन तदनुरोधे रमा०
न षष्ठीसमासस्यैवोचितत्वात्। अत्रापि समनस्क इत्यादौ नोपस्थास्याव्यान्तरदंडकोरचित्कर्मवासनादेहादीनां सहबुद्धिप ५०

द्वितीयवल्ल्यां जीवस्वरूपेण निरूपितश्च सर्वो - ति । तेन विविच्य शोधित इति तदर्थोयं तृतीयवल्ल्या आरंभः ॥ ५

रिवं हरकलेनोपसंग्रहः सूचितो भवति । पूर्वं सदा गम्युदितीति कथनेन कदाचिद्गम्युदितेन भवतीति चेन्न हितेनापि क्रमेण निःश्रेयसं
प्राप्तव्यमेवेति सूचनात् तदा समनस्कत्व मुदितादौ सति का वार्त्तेति कैमुतिकन्यायः सूचित इति विज्ञेयं । अत्र नर इति विशेष्य
स्य पूर्वनिर्देशात् स्थाने पाठो दृष्टान्तोपि संदृष्ट्यादियुतात् विष्णोः परं प्राप्नुयादिति सूचनाय । अथेशास्तद्विष्णोः सत्र शोधि
तत्वात् परिशिष्टं जीवं शोधयति इंद्रियेभ्य इति । अथ न जायते म्रियते वेत्यादि मंत्रे जीवस्य शोधनात् मंत्रोयं तदर्थ इति चेन्न ।
अविद्यापटलनिवृत्तौ दर्शनं दर्शने सति तन्निवृत्तिरित्यन्योन्याश्रयापत्तेरित्याशंकाद्दर्शनोपायमविद्यायां सत्यामप्याह
दृश्यते त्विति तथा चेष आत्मा ऽविद्यावृतः स्वतएव न प्रकाशते । किं तूपायतः तत्रानुरूपधारणा । दृश्यत एवेत्यर्थः । अर्थो निं
द्रियेषु नियच्छेत् इंद्रियेषु साकारं यथा न समर्पयंति तथा कुर्यात् इंद्रियाणि च मनसि नियच्छेत् दर्थाकारं गृहीत्वा यथा मन
सि न समर्पयेयु [illegible] युस्तथा कुर्यादित्येकमते योजनीयं । आत्मा निरि
न्द्रियाकाररहितं कुर्यादित्यर्थः तथा चायमेव समाधिरित्यभिप्रायः । अनेनेन्द्रियेभ्यः पराह्यर्था अर्थेभ्यश्च परं मनः मनसस्तु
पराबुद्धिर्बुद्धेरात्मा महान्परः महतः परमव्यक्तमव्यक्तात्पुरुषः परः पुरुषान्न परं किंचित्सा काष्ठा सा परागतिरिति मंत्रमु

क०भा०
५१

पात्रः क्रमः समाध्यनुगुणाद्विक्लिष्टेरितव्यं। स्वशिष्यान्प्रतियमसमुपदिष्टार्थमतिसंग्रहेणास्तुचयन्ताने वनिवृत्तिमार्गेश्र
वणस्योपदेष्टाग्रेष्ये नैव वरजत्वान्मननात्मकेप्रोत्साहन् ज्ञानस्याव्यभिचरितफलकत्वं विशदयति उत्तिष्ठतेति। अत्रोत्ति
ष्ठत जाग्रत निबोधतेति मध्यमपुरुषबहुवचनेन नचिकेतसि तदनुपपत्तेर्द्वितीयगुरोः स्वशिष्यान्प्रतीयमुक्तिरिति प्रा
गेव विधितं। उत्तिष्ठत हे शिष्याः मोहलक्षणनिद्राक्रान्तिवशतः संसारलक्षणशय्यायां निःशंकं सुप्ताः स्वस्वरूपं विस्मृ
स शयानाः स्थ उत्तिष्ठत संसारशय्यातः उत्थानं कुरुत तत्रास्यामपहसवैराग्यं कुरुतेत्यर्थः। जाग्रत जागरणं कुरुत स
मुत्थानानन्तरमपि मोहलक्षणनिद्रायाः शेषमपि त्यजत शेषे सति पुनरपि गाढस्वाप एव भवेत् अतो वैराग्ये सति पारि
व्राज्येन मोहं समूलमुन्मूलयतेति यावत् न केवलं पारिव्राज्येनैव कार्यसिद्धिः किंतु वरान् श्रेष्ठान् गुरून् प्राप्याश्रित्य नि
बोधत तत्त्वं ब्रह्म जानीध्वं तेन ज्ञानेन साक्षात्कारपर्यवसायिना द्विविधापि मुक्तिः परमपुरुषार्थरूपा करतलगतैवेति
भावः। अत्र वरान्प्राप्य निबोधतेति वक्तव्ये प्राप्येत्यस्य द्वितीयान्तात्पूर्वं पाठः वरगुरूणामलाभे सत्यवराणामगुरूणां समादर राम०
णीयाः नेतरपरोक्षज्ञानासंपादनेपि परोक्षज्ञानस्य संपादयितुं शक्तत्वेन निरुक्तिसरणौ शिष्यप्रवर्त्तकत्वसंभवात्। ५१

अत एव पूर्वं न नरेणावरेण प्रोक्त एव सुविज्ञेय इति सूपसर्गसन्निवेशेन वरेण गुरुः सुविज्ञानमपरोक्षं संपादयेत् अवरगुरुस्तु निहीन
मार्गोचितं परोक्षज्ञानं संपादयेदेवेति सूचितं। अथवा नितिपरं गुरुरूपं कथं योज्यते ग्राहकमानाभावादिति चेत् न नरेणावरेण प्रोक्त ए
ष सुविज्ञेयः अनन्यप्रोक्ते मदन्यो ज्ञातुमर्हतीति क इत्यादेरप्यत्र सः आश्चर्योविज्ञैः साध्विगुरुनिर्देशे पुनर्नरेणावरेणेत्यवरपदप्रयो
गात्। गुरुरूपसमाश्रयणेन विलक्षणाविलक्षणोपदेशभेदेनात्मतत्त्वस्य हृदयंगमत्वसंभवाद्गुरुवचने गुरुरूपसंगतमेव पद्वाव
रानिति गुरुरूपं मा भूत् सब्रह्मचारिपरं मननाय भवतु अथवा संवादकर्ते पुरुषाणां बाहुल्यात्तत्परं भवतु। अथ ज्ञानमव्यभिचारि वेदवि
हितफलकं चेत्तर्हि गौरवोऽस्या बहवः समाश्रयणीयाः यदि ज्योतिष्टोमादिकमेव वेदविहितफलमंगवैगुण्यादिना निष्फलं वा भवेत्तर्हि
निष्कंपा बहुगुणोप्युद्गमोनकंपप्रवृत्तिः स्याद्धिंसाशंकामव्यवहिताव्यभिचरितानुभूयमानफलकं ज्ञानमिति ज्ञापयन् परिहरति
क्षुरस्येति। क्षुरस्य केशवपनसाधनीभूतशास्त्रविशेषस्य धारा अग्रभागः निशिता सती शाणोपलादिना तीक्ष्णीकृता सती दुरत्य
या अतिक्रमितुमशक्या अनुल्लंघनीया व्यभिचारेण केशान्न छिनत्त्येव। पथो निहन्ति मार्गं स्वसंबंधिनं तदुत्तरोत्तरेति निर्दिष्टशास्त्र
लक्षणा हि त्रिविधः स्मृत इति स्मरणात् तत्र लक्षणं दुर्गं जलगिरिवनादिदुष्प्रवेशं पुरमिव कामक्रोधलोभमोहमयसंसारवनादिभि

गहनत्वेन दुष्प्राप्यमितरजनैर्निशितं सत् श्रवणमननादिभिर्विशदीकृतबुद्ध्या प्राप्तं समस्त दुरत्ययं श्रवणप्राप्यं तदुल्लंघ्य पुनरपि ग्रह
निमार्गे विषयसंसारगमनेन भवतीति यावत्तद्ब्रह्मस्वरूपमप्राप्यान्यत्र गमनेन भवेदेवेति भावः अत्र निशिता दुरत्ययेति प
दद्रूपं लिंगविपरिणामेनानुषज्यते अत्र क्षुरधारया दुर्गस्य च ब्रह्मलक्षणस्याध्वनो रुपमानोपमेयभावः सूचितो भव
ति। यद्वा शाणनिशिता दुरत्ययेत्यादीन्युपमानोपमेयगतानि पदानि द्वितीयांतान्येव प्रथमांतानि धारेत्यादिपदत्रयेपि सुपामि
ति द्वितीयाया डादेशेन रूपं विज्ञेयं। क्षुरस्य धारां निशितां सतीं दुरत्ययां कवयो वदंति दुर्गं कामक्रोधादिरिपुजलवनाद्यावृतं
दुष्प्रापं पुरं पथः ज्ञानलक्षणान्निर्वाणमार्गस्य संबंधि नगररूपं निशितं शुद्धबुद्ध्या प्राप्तं तत्ब्रह्मस्वरूपं दुरत्ययं अश्रवणप्रा
प्यं कवयो वदंतीत्यर्थः। प्रथमांतपक्षेपि निशिता दुरत्ययेति पदद्वयं दुर्गं तत्समुन्नेयं। अथवा निशिता निशितं बुद्धिस्वस्य
स्तं दुर्गं कामादिरिपुनाद्यावृतं नगररूपं तत्ब्रह्म निशितानन्तमुमुक्षुस्पृष्टत्वान्पथो नगरसंबंधिनो मार्गान्द्वारभूतान्द्वाराणि सं
प्युकुम्भवदंति संतो बहुप्रकाराणि दुराचाराणि। सत्साजेवद्धीर्घमग्नोचाविघाः पण्णामनमो हप्रतिबंधकानीत्यादीनि सनत्सु
जातीयादिप्रतिपादितानि दुरत्यया दुरत्यय दुरत्ययां श्रवणप्राप्यं श्रवणप्राप्यं कवयो वदंतीत्यर्थः अस्मिन्पक्षे दृष्टां

तेक्षुरस्येतिषष्ठ्यंतनिर्देशात् दार्ष्टांतिकेपिपारिव्राज्यादिलक्षणानिवृत्तिमार्गस्यैवनिर्देशः अथवा ज्ञानंसाक्षात्कारलक्ष
णमवगतार्थप्रापकत्वादवगतार्थपदेननिराकृतीकृतं दुर्गत्वेनरूपितंपथ्यः वेदांतश्रवणादिलक्षणनिवृत्तिमार्गस्यसं
बंधिदुर्गकामक्रोधादिवनाद्यावृतंपुरंतत्तत्त्वप्रापकत्वाद्ब्रह्मस्वरूपंसाक्षात्कारलक्षणंज्ञानं। निशितमभ्युक्तंसदु
रत्ययंश्चावश्यभाविफलकमेवभवति। एवंकवयोवदंतीत्यर्थः। इतीयातकल्पेपिपथोनिवृत्तिमार्गस्यसंबंधिनिशि
तमभ्युक्तंदुर्गंतत्तद्ब्रह्मप्रापकंज्ञानंदुरत्ययंकवयोवदंतीत्यन्वयः। पथइत्यस्यद्वितीयाबहुवचनांतत्वेज्ञानपुरद्वारा
णीतियोजनीयं। इतरत्पूर्ववदेवसमुन्नेयं। अथात्रक्षुरस्येतिदृष्टांतवाक्येधारेत्यादिकप्रथमांतमितिप्रथमकल्पेनिर्दिशते
तिपरस्यहेतुविधेयविशेषणत्वात् दुरत्ययेत्यस्यस्वरूपविधेयविशेषणत्वात् धारापदादिशेषात्यस्यात्रत्यदत्ययस्यापि
निर्देशः समुचितएव। दुर्गमित्यादिदार्ष्टांतिकवाक्येतुपथइतिषष्ठ्यंतंप्रथमंपठनीयमपि दुर्गमित्यपदस्यस्थास्यतिष्ठितं
नत्विंनिबंधनमितिचेत्तपथामार्गरहितंलोकेगीयादिदुर्गसंभावितंतत्रपदमपिदुर्गंनिर्देश्यतेतिद्योत्यते एवंचप्रकृते
निर्देश्यत्वसूचनात्पथइतिमार्गसंबंधितायाअपिकथनात्ज्ञानमार्गातिरिक्तोमार्गोनास्त्येवनान्यः पंथाविद्यते

कं॰भा॰ अयनाय संपश्यन् ब्रह्मपरमं यातिनान्येन हेतुनेत्यादि श्रुतेरिति सूच्यते। अत्र सुपामिति तृतीयांतपक्षएव प्रथमांतद्वितीयां
५३ तपक्षयोरनुकूलः लिंगविपरिणामेनानुषंगाभावात् अथ द्वितीयांतपक्षे दृष्टांते द्वितीयांतहेतुविधेयविशेषणस्य
विशेष्यपश्चाद्भावित्वाभावात् स्वरूपविधेयविशेषणस्यैव द्वितीयांतविशेष्यात्पश्चाद्भावित्वात्तथात्वानिश्चितेति विशे
ष्यानंतरं निश्चितेत्युद्देश्यविशेषणं किमित्युपात्तमिति चेत् निश्चितेति विशेषणं न क्षुरधारापाः साहजिकं किंत्वाग
तुकमिति सूचनाय एवं च दृष्टांतिके विदुर्गे निशितत्वस्य साहजिकत्वेन साध्यत्व पाग्वीघ्नुसारेणेन प्रवणादिकम
वश्यसंपादनीयं परमपुरुषार्थलिप्सुना। श्रवणादेरांगनुकत्वात्साध्यत्वाभावात्तु रूपप्रवृत्तिरूपप्रयत्न इतिभावः
एवं पथ इति द्वितीयांतमिति पक्षे विदुर्गेतद्विविक्षया पथिपदात्पूर्वं निर्देशः निशितिमरसिं विनासरणांतरेनेति पूर्ववत्सू
चनाय। अत्र तदुर्गमिति ब्रह्मोद्देश्येन दुर्गत्वरूपगुणान्वयः इत्यत्र शंत्याशीर्न पथ्य इत्यकथनात् निगरणारूपकसंसर्ग इति
विभावनीयं। अत्र तदित्यस्य विशेष्यत्वात् दुर्गं पथ इति निर्दिष्टत्वेतदित्यस्य पूर्वोत्ते निर्देशः यत्र यत्र रूपकं तत्र सर्वत्रापि एप॰
धर्मिसमानसत्ताकं सारूप्यमूलं भवतीति प्रकृतेतु पथिसंबंधो वा दुर्गत्वरूपकमूलभूतसादृश्यं वा न धर्मिसमानसत्ताकं तस्मा ५३

रूपकमार्गसंबंधिनां वस्तुतो न सत्त्वं तत्त्वदृष्ट्यैकल्पनमेवकेवलं सर्वोपि व्यवहार इति सूचयति। यद्वा गुरूपसदनेन ज्ञानमव
श्यं संपादनीयमिति प्राप्य वरान्निबोधतेत्युक्तं तत्र विना गुरूपसदनादिकं संसारो दुस्तर इति दर्शयति क्षुरस्येति। यथा
क्षुरस्य धारा निशिता सती दुरत्यया भवति तथा पथः प्रवृत्तिमार्गस्य संबंधि दुर्गं दुर्गरूपं निशितं वा दुष्कालमारभ्य नानावा
सनाकवलीकृतेन तन्नाशायनस्थानभूतं प्रपंचस्वरूपं स्वर्गादिलक्षणं दुरत्ययं दुस्तरमिति यावत्। अतो बोध एव तद्द्वारो
धीगुरूपसदनादिनावश्यं संपादनीय इति भावः। अत्र द्वितीयांतनिशितेत्यस्य पद्यस्य पाठः। निशितत्वस्य संपाद्यत्वेन क्षुर
सादृश्यिकगुणत्वाभावात्तकुंठीभावोपि निशितत्ववत्संपादयितुं शक्य इति सूचनद्वारा संसारवासनानामपि जन्यत्वात्तद्वि
रुद्धाद्वैतात्मसाक्षात्कारादिभिः संपादितैर्निवारयितुं शक्यं तेन वासनादय इति सूचयति। अत्र पथ्य इत्यस्मात्पूर्वं दुर्गमिति ग्रह
णात्प्रवृत्तिमार्गे इष्टापूर्तादिलक्षणात्तत्संबंधिनरकादिलक्षणं दुर्गमपीह गृह्यत इति ज्ञाप्यते। स्वर्गादेर्नोति दुर्गत्वं ज्ञानं नि
वृत्त्येत्यादि निसूचनाय तदिति विशेष्यं सर्वत्र पठितमितरत्पूर्ववद्द्रष्टव्यं। अथ द्वितीयोर्थः स्वशिष्यान्बोधयितुं द्विती
यवल्लीशेषस्थितजीवतदधिष्ठानचैतन्यपरमंत्रान्द्वितीयवल्ल्यंतस्थितं पदस्य ब्रह्मचेती प्रातदधिष्ठानचैतन्यपरमंत्रं

तृतीयावल्लीच जीवेशान्तरविशिष्टानचैतन्यपरामवलंब्य तत्र जीवेशसामानाधिकरण्यस्य विस्पष्टत्वाभावात् समभिव्याहारविशे
षेणैव जीवेशसामानाधिकरण्यस्यान्यापर्यालोचनेयैवलभ्यत्वेन द्वितीयवल्लीशेषतृतीयवल्ल्योः संग्रहे विवरणाय जीवेशसा
मानाधिकरण्यं द्वितीयवल्लीशेषतृतीयवल्लीतात्पर्यं सिद्धमिति दर्शयति अपावृमिति। अत्रेंद्रियेभ्यः परा ह्यर्था इतिमंत्रो
पात्तशोधितजीवोद्देशेन स तु तत्पदमाप्नोति यस्माद्भूयो न जायत इत्येतदधुना परमाप्नोतीति द्विमलैः परमं पदमिति मंत्रोपात्तशो
धितेशस्वरूपं विधीयते। महतः परं महत्त्वात् स्थूलत्वेदृष्टत्वात् पिद्गुरवश्नितरस्य द्विध्रुवं स्थिरमचंचलं अनेन महतः परमव्यक्तमव्य
क्तात्पुरुषः परः पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिरिति कथितं शोधितजीवस्वरूपं परिगृहीतं भवति अत्र महतः परमि
त्येतावता तावदव्यक्तस्यापि परिग्रहे प्रसक्ते सति ध्रुवमिति पदमुपात्तं इदं चाव्यक्तात्पुरुषः पर इत्यं शास्या नेनिर्दिष्टमव्यक्तव्या
वर्त्तकं अव्यक्तं रजोगुणवत्त्वाद्रजसश्च चलद्रूपत्वाच्चलं न ध्रुवं किंचाव्यक्तं महदादिरूपेण परिणामित्वात् ध्रुवमेवाव्यक्तं कार
कं पतत्त्वधानमृषिसत्तमैः। प्रोच्यते प्रकृतिः सूक्ष्मा नित्यं सदसदात्मकं। अक्षय्यं नान्यदाधारममेयं सी घांतं वै मल्पादन्विति एप०
मजरं ध्रुवं। शब्दस्पर्शविहीनं च रूपादिभिरसंहितं॥ त्रिगुणं तज्जगद्योनिरनादिप्रभवाप्ययं। तेनाग्रे सर्वमेवासीद्विष्णुपुराणा ५४

रिष्टत्वकस्य ध्रुवत्वेन निर्देशो महदाद्यपेक्षया न सहजतः स्पष्टः पूर्वं साम्यावस्थावत्त्वाद् ध्रुवमिति बोध्य पारनीयं अत्र महतः परं ध्रु
वमिति महदव्यक्तपरत्वनिर्देशादेवेन्द्रियार्थादिवैलक्षण्यं शोधितत्वं प्रकृत्यर्थे सिद्धमेव न त्वापीन्द्रियेभ्य इति मन्तव्यं इन्द्रियादिपरत्वादिना
क्रमेणावैलक्षण्यनिरूपणान्नरहन्तुरोधेन विषयपरिशोधनार्थं इन्द्रियार्थादिव्यावर्त्तकान्यपि विशेषणानि दर्शयति स्माशब्दमि
त्यादिना अनेन विशेषणेनाव्यावर्त्याभावेप्यन्यथासिद्धत्वेन विषयशोधनद्वारा वस्तुनिर्णयजननपरतया वैयर्थ्याशंकाप
रिहृतावेदितव्या। महतः परत्वे हेतुर्नाद्यनंतमिति। महदादीनामिन्द्रियानां नाशादित्वादंतत्वाच्च तद्वैलक्षण्यं प्रकृतावित्व पुरुषे
पि भवतीति भावः पंचपि प्रकृतिरप्यनाद्यनंतामवतिनथापि पुरुषगतानाद्यनंतत्वमन्यादृशं प्रकृतिगतमन्यादृशमेवेति
विज्ञेयं प्रकृतेः सत्वरजस्तमोमयत्वेन परिणामित्वेन च कार्यद्वारेण स्वनिनाशत्वेन सूक्ष्मरूपेणापयाकत्वं चिरेवानादि
त्वानंतत्वयोरभ्युपेयत्वात् पुरुषस्य निरवयवत्वनित्यत्वनिष्परिणामत्वादिहेतुभिर्निरंकुशानादित्वानंतत्वाभ्युपगमा
त् अनेन विशेषणद्वयेन मनोबुद्धिवैलक्षण्यं समानसाम्यात्सूचितं विज्ञेयं। अथेंद्रियार्थवैलक्षण्यं दर्शयति अशब्दमि
त्यादिना। नथाव्यापकस्याधाराधेयभावलक्षणसंबंधेन ग्राह्यग्राहकलक्षणसंबंधेन वा नादात्म्यलक्षणसंबंधेन वादृष्टा बद्धे

नश्रोत्राकाशशब्दतन्मात्रवैलक्षण्यंसिद्धंभवतिएवंनस्पर्शोयस्यनरूपंयस्येतिनिरूक्तात्मनमसंबंधेनतदस्पर्शोमरूपंचेतिस्पर्शोरूपत
न्मात्रावायुतेजस्त्वक्चक्षुर्वैलक्षण्यंकथितंभवति अत्रशब्दमित्यादिविशेषणैर्भूतत्रयादिभिन्नत्वेसूचितेतत्रहेतुमाह
अव्ययमिति।नव्ययोयस्यतस्यपंचपत्तत्वांतरात्मनापरिणाममत्तद्राहित्यकथनात्शब्दस्पर्शरूपरसतन्मात्रावैलक्ष
ण्यसूचितंशब्दतन्मात्रादीनांतत्वांतरात्मनापरिणामवत्वात्तत्वांतरत्वंचोपादानगतपदार्थविभाजकजात्यनाक्रांत
त्वेसतिजात्यंतराक्रांतत्वं।अनेनघटादेर्नतत्वांतरत्वंतस्योपादानगतपृथिवीत्वजात्याघाक्रांतत्वात्।एवंव्ययोऽवयवद्वारावत्त्व
तदारंभकत्वंतद्राहित्यमव्ययत्वंतेनेंद्रियाणांसमष्टिरूपाणांव्यष्टीद्रियेष्ववयवत्वेनानतायामारंभकत्वान्महाभूतानांस्वस्वकार्या
रंभकत्वात्तन्मात्राणामपिसमष्टिरूपाणांव्यष्टिप्रारंभकत्वाद्व्यष्टीनामप्यवयवशैथिल्यभ्रंशादिलक्षणाव्ययवत्वात्तद्वैलक्ष
ण्यमव्ययपदेनज्ञापितंभवति।अथजलपृथिवीतत्त्वाह्लरूकेंद्रियद्वयरसगंधतन्मात्रादिवैलक्षण्यंदर्शयतितथ्येत्यादिना।
र तथ्यत्रिभूतगतव्ययादिप्रकारेणासंररसोनविद्यतेयस्यतदरसं।अनेनरसतन्मात्ररसनेंद्रियजलादिवैलक्षण्यंकथितंभवति रा॰म॰
अथजलवैलक्षण्येपृथिवीसाधारणंहेत्वंतरमपिदर्शयतिनित्यमिति।तथानित्यमितिहेतुररसत्वेऽगंधत्वेचान्वेतितथा ५५

जलेहेतुद्वयंपृथिव्यामेकोहेतुरितिविभागोऽयपपरस्पतत्वांतराजनकार्थकल्पप्रसेइतिवेदितव्यं। निम्पनियतमेकरूपंनिरवयववत्वा
द्विकाररहितंकठिनावयवसंयोगादिरहितंजलपृथिव्योन्तुकठिनसंयोगवत्त्वौभवती। जलेहिमकरकादौकाठिन्यसत्वान्नोकारि
धारकत्वात्पृथिव्यांचप्रायेणानुभवात्नाकाशादित्रिके अतएवागांधवदितिमनुप्रअकाशादिभूतवैलक्षण्यप्रदर्शना
यकाठिन्यंज्ञापयितुंप्रयुक्तः पृथिव्यांजलापेक्षयापिकाठिन्यस्यविलक्षणत्वात सुवर्णमण्यादेरपिपार्थिवांप्राएवकाठिन्या
भ्युपगमात्नकापिदोषइतिविवेकः अत्रेदंध्येयं परास्यपर्या अर्थेभ्यश्चपरमितिसूत्रितवैलक्षण्यमशब्दमित्यादिनापरि
गृहीतंमनसस्तुपराबुद्धिर्बुद्धेरात्मामहान्परइत्यस्यांश्रुतौ अनाद्यनंतमितिपदाभ्यांस्थानसंख्यासाम्यात्परिगृहीतःमहतः
परमव्यक्तमव्यक्तात्पुरुषःपरइत्यंशाःमहतःपरंध्रुवमित्यनेनगृहीतइतिविभजनीयं। यत्। व्यापकंअथसर्वेनामांतरगतियस्या
दमेवकस्मादित्परंनभवतीतिचेत्तथासतिप्रतिनिर्देशकंतत्परमपिक्लीबमेवदृश्येतनचतथादृश्यते। अनेनात्पुरुषैकधानो
रेवेदंशास्त्रेतेरूपंविशेषयपरिच्छिन्नपुंसकत्वपदापाठेः न्येषामपिबहूनांज्ञानानंदादिलक्षणगुणानांसंग्रहायेतिमतंतद्हितथैवप
तपरंसर्वेनामैवास्तुतदितिपरंचाध्याहृयतां अत्रपरिहसादिनंपुंसकानांतमितिपुल्लिंगस्यचप्रयोगःविजातीयजीवेशानिर्दे

क०भा० ५६

अविभागज्ञापनपूर्वकं सामानाधिकरण्यसूचनाय। अत्र निचाय्येति तमित्यस्मात्पूर्वं निर्दिष्टं सत्त्वव्यवधायकत्वात् महतः परं ध्रुवमि
ति विशेषणाद्ध्रुवमपीह ये ष्व इति मंत्रानुरोधेन जीवपरमेव नेशास्यत इत्युपात्तस्य विशेषणत्वमिति ज्ञापयतीति तथा चाशब्दादिध्रु
वांतविशेषणविशिष्टं परं जीवस्वरूपं तन्मतमशेषं निचाय्य चित्वा जीवमीशात्मना चित्वाकृत्वा अत्र करणं ज्ञानं ज्ञात्वेतिया
वत् मृत्युमुखात्संसारविघातमुखाद्दूरनात् आवरणात् मुच्यते मुक्तो भवतीत्यर्थः। अत्र जीवेशसामानाधिकरण्यस्य
विभिन्नलिंगकपदसन्निवेशादिप्रमाणेन द्वितीयगुरुणास्पष्टं ज्ञापितत्वान्न तृतीयग्रहणमेतद्वैतदिति ब्राह्मणं न प्रवक्ष्ये
तमिति विवेचनीयं। ब्रह्मलोके महीयते इत्युक्तमो भवतीत्यन्वयः। अत्र श्रुत्वोत्क्षिप्य श्रवणमननादिविवक्षणात्
तेन च परोक्षज्ञानोदयात् परोक्षमपि यज्ज्ञानं शास्त्रादेशिकपूर्वकं बुद्धिपूर्वकृतं पापं कृत्स्नं दहति वह्निवदिति स्मरणात्
वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्त्वाः ते ब्रह्मलोके तु परान्तकाले परामृतात्परिमुच्यन्ति सर्वे इति श्रु
तेश्च परोक्षज्ञानाद्ब्रह्मलोके प्रकाशमानत्वमुचितमेव अत्र श्रवणोत्तरं कथने प्रवृत्तिरिति श्रुत्वोक्त्वा चेति वक्तव्ये तथैव पा रामा०
॥ ठः श्रवणादपि ब्रह्मलोके मनं भवतीति सूचनाय। एवं चोक्ते सुपात्रे मनने श्रवणपूर्वकत्वं सिद्धमेव तस्य तद्धेतुत्वात् श्रुत्वेति ५६

ग्रहणात् केवलमेव श्रवणं विवक्षितं भवति एवं च कारोपमप्यर्थो भवति पत्वा परिविष्यद्रयामुद्राः प्राप्नुयात् पत्वा पिद्रयामुद्रः
प्राप्नुयादिसाहाय्यपिनाविरोधोऽत्र स्वर्गं केवलनामसूचनात् श्रुत्वापि केवलश्रवणातोपि स्वर्थलाभसंभवात्। अथ पाठमात्रक
थनश्रवणपरत्वमेवोक्त्वा श्रुत्वेसनयोः परयोः किमिति न स्वीक्रियत इति चेत् ब्रह्मलोके महीयते इत्यानंस्यापकल्प्यते इति विशिष्टफल
श्रवणेन वेदान्तविज्ञानसुनिश्चितार्था इति श्रुत्याद्यनुरोधेन हार्थज्ञानपर्यन्तानुधावनं समुचितमेव अत्र सनातनं मृत्युप्रोक्तं ना
चिकेतमुपाख्यानमिति क्रमेणानिर्देशसमुचिते सति व्यत्ययेन पाठः फलविशेषद्योतनाय तत्र नचिकेतसायं ग्रंथो मृत्युविप्रवक्त्र
इति नाचिकेतमिति परं प्रथमं पठितं। मृत्युपरंपरयैवान्यैरपीदमुपाख्यानमुपाख्यातमिति सूचनाय मृत्युप्रोक्तमिति पदात्पूर्वं
मुपाख्यानमिति पठितं सर्वेष्वपि कल्पेषु पश्चादन्यैः प्रवर्तितत्वेपि कल्पादावादौ मृत्युभिरेव तदानत्वप्रोक्तमिदमुपाख्यानं प्रथमं
प्रवर्तकास्तु मृत्यव एवेति सूचनाय मृत्युप्रोक्तमिति पदानंतरं सनातनमिति परं पठितं मृत्युप्रोक्तत्वपरंपरयैवेदं सनातनमित्यर्थ
लाभसंभवात् अत्र सनातनत्वग्रहणादनादिसिद्धत्वेनाधुनिकत्वकृतानादरश्रद्धापरिहृता भवति मृत्युप्रोक्तमित्यनेन देवा
नामपीदमान्यमिति श्रद्धातिशयः संपादनीय इति सूचितं नाचिकेतमित्यनेन देवानामेवेहाधिकारो मनुजानामप्यधिकारस्ती

क०भा० ५८ तिसूच्यते। अत्र मेधावीत्यस्य सर्वोत्रोपठनीयस्य ब्रह्मलोकपर्यन्तं सर्वेपाठः श्रवणमननादिपरिपक्वबुद्धेर्ब्रह्मलोके प्रजाहेतुसाधार
णेपन श्रवणादिमतो ब्रह्मलोकगमनमात्रमिति सूचयति। अथैतद्द्विधाश्रवणेन परेषामपि ज्ञानसंपन्नेभ्यस्त्वधं संज्ञातात पुण्यला
रभ्यासविशेषवत्त्वाच्च परिपक्वज्ञानादनंतरापक्रमेण भवतीत्याह य इदमिति योजनं प्रयतः परिशुद्धः सन् इदमुपाख्यानं ब्रह्म
संसद्विष्ठा सगणसमाजे श्राद्धकालेवा श्रावयेत् सज्जनः। श्रावितं सापकल्यनेन समर्थो भवतीत्यन्वयः कल्प्यत इति श्रावणेनसंपा
द्यत इत्यर्थः अत्र संसदीति निर्देशात् परस्परचर्चासूचनेन च चौकर्तॄणां ज्ञानदार्ढ्यं सूच्यते श्राद्धकालेवेत्यादिनिर्देशात् ध
मेराजस्य पितृवर्गस्यामित्वात् स्वस्वामिवचनश्रवणतः संतोषाविर्भावात् ब्रह्मविद्याश्रवणेन ज्ञानदार्ढ्यादयाविर्भावात्
संतोषपारवश्येन पितृकृतानुग्रहेण श्रावयितुर्ज्ञानदार्ढ्यप्राप्त्युभयोर्वा ज्ञानस्य फलं संमुच्चितमेव। अत्र श्रावयेदित्यस्यानेन पठनीय
स ब्रह्मसंसदीतिपर्यन्तं सर्वेपाठः श्रोत्रादिसंभावयामपि श्रावणागमयति। तदिति तच्चेतिचः इष्टाणी योयोग्यत्वात् तदिदं सत्रमुपास्येति मुल
किञ्चदं स रूपं संचे सर्व्वः ॥ सचेति चकारः केवलश्रवणादिपरं सर्वं मनूपात्तं ब्रह्मसादिसंसद्वृष्टकान्पित्रॄन्सु समुच्छिनोतीति गुरुत्वं रह राम० ५८
स्यगुह्याया माया विद्यादिलक्षणायां भवमभिव्यक्तं गुरुत्वं तत्प्रतिपादकमपि गुरुत्वं परमं श्रेष्ठं परमात्मपरत्वात् इदं संप्रतिप

ध्यमानां। अत्र गुह्यमिति विशेषणं इदं परममिति विशेषणोपमवृत्तः। अत्र प्रयत्नस्य सन्निसम्यहेतु विधेय विशेषणत्वेन यद् इति प्रथमांतो
ते। पठनीयस्याग्रेपाठः श्रीहृद्यु चिंतांधिकापेक्षितेति पूर्वं सिद्धापि मुक्तिताश्रवणमननाद्युत्तरमधिका भवति सकलपापनिर्हृ
रणादिति च सूचनायेति तेयं आनंदसमुक्तिं कल्पनइतीति अत्रेतिकारः प्रकारवाची एवमेवेमौ मंत्रौ षष्ठवल्यं तेपि पठनी
यावित्यर्थः। द्विरुक्तिरध्यायपरिसमाप्त्यर्था इति श्री॥ इ प्रथमेध्याये द्वितीयतृतीयवल्ल्यां प्रथमवल्ल्यां मंत्रविशेषैष्वकैश्चिर
र्वेदार्थस्तदुपयोगिपदार्थाश्च जीवेशसाधनतत्प्रतिद्वंद्विलक्षणायेपठितास्सूचिताश्चैतेषां विशदीकरणाय प्रथमेन गुरुणा नचि
केतसो मननरूपं द्वितीयोध्याय आरभ्यते। तत्राप्यध्याये वल्लीत्रय इति विभागेन श्रेयो हि धीरोऽभिप्रेयसो
वृणीते प्रेयो मंदो योगक्षेमाद्वृणीते इति प्रकरणसिद्धार्थः पराचीति प्रथमेन मंत्रेणाविद्यायामंतरे वर्तमानाः स्वयंधीराः
पुनःपुनर्वशमापद्यते मे इति प्रकरणपाठार्थः पराञ्च इति द्वितीयमंत्रेणाविशदीक्रियते। अत एवानयोर्द्वयोरपि मंत्रयोर
कविधयाविभिन्नप्रकरणार्थविवरणपरत्वस्सूचनाय प्रथमे मंत्रे कश्चिद्धीर इति धीरपदमेकवचनं च निर्दिष्टं द्वितीयवल्ल्या
दौ तथैव पाठेन तदेशस्यैव प्रत्यभिज्ञासंभवात्। एवं बालास्तेमृत्सोर्यंति विततस्य पाशमिति बहुवचनं बालपदमृत्सव मात्सानिर्दि न

कं॰भा॰
५८

धनेनद्वितीयप्रकरणार्थ एवंद्वितीयेनमनुनाविशदीक्रियत इतिप्रत्यभिज्ञाबलेनज्ञातुंशक्यं। अतएवचधुवमप्युवेष्ठिहनप्राथ्यंप
नेउत्तिवाक्येनतस्यध्रुवैःप्राप्यतेहि ध्रुवंतदितिवाक्यस्यायेमाणमर्थंसंबोधयत् स्वस्यचतुर्थवल्लीद्वितीयमनुव्याख्येयतो
द्रष्टव्यं। अत्रद्वितीयवल्लांहीयते॰र्थाद्धउप्रेयोवृणीते। प्रेयोमंदोयोगक्षेमाद्वृणीते इतिकस्यचित्संसारप्रवृत्तिनिबद्धा
न्तरेतत्कथमुपपद्यते प्रवृत्तिनिवृत्तिमार्गयोर्निवृत्तिमार्गतएवनिरतिशयपुरुषार्थसिद्धेः प्रवृत्तिमार्गतो॰तिजघन्यपु
रुषार्थसिद्धेःदुःखभूयिष्ठत्वान्निवृत्तिमार्गप्रवर्त्तजनवत्समाणात्तो ज्ञातुंशक्यत्वेन प्रवृत्तिमार्गे॰तिजघन्यफलेष्वपि
तरजनस्यप्रवृत्तिःसर्वानीरसपदार्थयोस्तथैवज्ञातयोर्नीरसेमंदप्रज्ञस्यापिप्रवृत्तेःकाप्यदर्शनादिसाशंकासमेवं
यदिलौकिकजनस्यनिवृत्तिमार्गेनिर्धारणपूर्वज्ञानंभवेत्तदेवनतस्यनभवतिसामग्र्यभावात् कस्यचित्स्वपुरुषधौरेय
स्यनित्यकर्मानुष्ठानमुद्दिश्यतःकारणभगवदनुग्रहीतस्यपुष्कलाभवतिनित्यकर्मानुष्ठानरहितेनेंद्रियादीनांभ
गवताबहिर्मुखानामेवसकलजनसाधारणेनमलिनत्यासर्जनात्तेनचमालिन्येनज्ञानसाधनीभूतेंद्रियैःप्रवृ
त्तिमार्गएवनिर्धारणज्ञानसंपादनान्निवृत्तिमार्गेप्रत्युतप्रमाणपबुद्धैरेवतेनदर्शनात्कस्यचिद्देवानेकजन्मपुण्यपरि

राम॰
५८

श्रुतेंद्रियवर्गस्य प्रवृत्तिमार्गे जिहासासंपादनपूर्वकं निवृत्तिमार्गेति द्धीरणात्मकं ज्ञानं तैः संपाद्यते न तु सकलजनसाधारणप
नेति मनसि निधायाह पराञ्चीति स्वयंभूः स्वयमेव भवतीति कर्त्तरि साधनं तत् रहितं तया न चास्य कश्चिज्जनिता न चाधिपः न त
त्समश्चाभ्यधिकश्च दृश्यते इति श्रुतेरिति स्वयंभूः परमात्मा मायोपाधिकः स तृणत्ति इंद्रियाणि बाह्याभ्यंतरलक्षणानि
त पराञ्चि पराङ्मुखानि विषयपरवशानि व्यतृणत् व्यनोत् हिंसार्थस्यापि धातोरुपसर्गयोगेनार्थांतरपरत्वौचित्यात्
धातूनामनेकार्थत्वाच्चोत्सादनार्थकत्वमिहाविरुद्धं ननु तृदि हिंसायामिति निर्देशादिहायं धातुर्हिंसार्थक एव कुतो
न प्रोज्झत इति चेत् न रवेषु पराक्कूलस्येव दोषत्वेन तस्यैवात्र ज्ञातत्वेन हत्तापनीयतया स्वरूपविधेयविशेषणत्वेनस
तोऽप्युत्पादनार्थकधातूनामेवान्वययोग्यतया अर्थान्तरपरधातूनामर्थासंगत्यात् । इतरथा प्रकृते पराञ्चीत्यस्योद्देश्य
विशेषणत्वेन स्वीकारात् खानां स्वरूपतो हिंसायाश्चाभावाद्विशेषतो हिंसान्वये सति निर्मूलय एवासिध्येदिति प्रत्य
क्प्रवणतायाएवेन्द्रियाणां सिद्धेरुत्तरवाक्येन तस्मात्पराङ्पश्यति नान्तरात्मन्निति कथनमसंगतमेव भवेदतस्तस्मादु
त्सादनार्थक एव व्यतृणदिति धातुरिस्वरूपामुपेयमेव । तस्मादिति यस्मात्तदा निपराक् स्वभावानि हृतानि तस्मा

क०भा० हेतोः पुरुषस्येंद्रियपरवशत्वात् पुरुषोयममुमुक्षुरिंद्रियैः पराक् बाह्यभूतं वस्तुजातं शब्दादिलक्षणं पश्यत्युपारेयत्वादिना अंतरात्म
५९ न्नमुपाधुनुमिति द्वितीयालोपः अंतरात्मानं शोधितत्वंपदार्थं न पश्यतीत्यन्वयः उत्तरवाक्ये पश्यतीत्यनुषंगः अंतरात्मानं
न पश्यतीत्यनेन द्वितीयवल्ल्याः श्रवणायापीत्यादिना पठितोऽर्थः संगृहीतो भवति। अत्र स्वयंभूरित्यस्य प्रथमांतस्य कर्तृ प्रथ
मं पठनीयस्य वाक्यांते पठो नार्थान्वयानुसारेणेति किं चिरंपि किं त्वनादिसिद्धमापि कं कालविशेषेणानभिव्यक्तं केवलमभि
व्यंजयति नापि तदभिव्यंजने स्वतंत्रः सन् स्वेच्छयावशानो यदा कदाचिद्विना साधनापेक्षामभिव्यंजयति कालविशेषमाणिकमो
रिसापेक्षत्वादित्याशिम्नूनतां भगवानिति सूचयति। एवं पराचीनि स्वरूपविधेयविशेषणस्य विधेयात्पूर्वनिर्देशः प्रसंगात्स्ववीक्ष
णावत् पराक्त्वेनाधुनिकं किंतु महत्त्रिमार्गस्यानादिमहत्त्वात्तद्धेतुभूतपराग्विषयग्रहणसामर्थ्यमपनादिसिद्धमेव अनभि
व्यक्तस्याभिव्यक्तिमात्रं स्वयंभुवा संपाद्यत इति सूचनाय। एवं तस्मादिति तत्पुरस्य वाक्यादौ निर्देशो व्यवहितार्थपरामर्शकत्व
स्याभावप्रयुक्तः एवं नांतरात्मन्निति वाक्ये नत्रः प्रथमपाठः पश्यतिक्रियायाः सत्वरान्वयापरदर्शनाभावे निस्संदिग्ध राम०
त्वज्ञापनायेति वेदितव्यं कश्चिदिति धीरः स्थिरबुद्धिः कश्चिज्जनः अमृतत्वं मुक्तिमिच्छन्सन् अत एव आवृत्तचक्षुः स ५९

न स्वत्र चक्षुः पदमिंद्रियसामान्योपलक्षकं विषयेभ्यः परावृत्तेंद्रियगणोपेतः सन् प्रत्यगात्मानं प्रतीचो जीवस्य सोपाधिक
स्यात्मा प्रत्यगात्मा शोधितत्वंपदार्थस्तं ऐक्षत् दृष्टवान् भूत् ऐक्षदिति लङः प्रत्ययस्य यः छांदसः अथ केवलाघवात्मनपकूचा
लावात्माचेतिकर्मधारय एवाद्रियतां किंशब्दभूतषष्ठीसमासाश्रयणेनेतिचेत् । तथा सति पुरस्कृत्निकत्वात् सोपाधि
कं जीवमेवैक्षदिति स्यात् ईदृशमीक्षणं च नातिश्लाघ्यं धापकैसकलजनसाधारणत्वात् प्रकरणादिना शोधितत्वंपदा
र्थज्ञानस्यैवेह विवक्षितत्वेन त्वंपदार्थशोधनस्य षष्ठीसमासमंतरा द्योतयितुमशक्यत्वादुक्तः षष्ठीसमास एवाश्र
यणीय इति दिक् । अथ वर्त्तमानावर्त्तमानार्थे साधारणे प्रयोगे कर्तव्ये वर्त्तमानलकार एव समुचित इति न्यायात्
प्रत्यगात्मानमीक्षेत इति लट्प्रयोक्तव्ये लङः प्रयोगः किंमूलक इति चेत् सत्यं परं लिहद्वितीयवल्यां कस्त्वमहामंदेदे
वं मरस्योत्तानुमर्हतीति स्यातिरिक्तस्य शोधितत्वंपदार्थस्य ज्ञानाधिक्षेपद्वारा स्वस्य शोधितत्वंपदार्थनिर्णयः संवृत्तो
ऽस्तीति सूचितत्वात् द्वितीयतृतीयवल्ली विवरणरूपत्वाच्च नुर्थेव ल्ल्यादौ येमेन स्वस्य त्वंपदार्थज्ञानं समभूदिति कस्त्वमहा
मतितिमंत्रविवरणायेव कथितोऽयं पराङ्मनुशासनस्त्वंचिय नु लङि ह्यभिहितः नन्वेवं सति परिहस्य प्रथमपुरुषप्रयोगः प्र

क॰भा॰
६०

योजननिमित्तादिवृत्तान्तः सर्वं तत्र संमतम् एव। अत्र च यमस्य स्वागतविनयसूचनमेव प्रथमपुरुषप्रयोगप्रयोजनं भवति। अत एव
संबोध्यं पुरुषं भवानेवमाहेति लोके व्यवहारः। उज्ज्वलसूचनफलकः संयुतो भवति। अत एव च स्वस्मिन्नेव गौणत्वं। प्रस्तावेहेति
भगवतः पतंजलेः ह्यक्षिपि समंजसेति दिक्। अत्रामृतत्वमिच्छन् सन् अत एवावृत्तचक्षुर्भवन् प्रत्यगात्मानमैक्षदिति विवक्ष-
या व्युत्क्रमेण पाठः। साधनचतुष्टयलाभाय आवृत्तचक्षुष्ट्वस्यामृतत्वमिच्छुत्वं। अपराविद्यायामंतरेव ज्ञेमानादृश्यादिप्रकरणा-
स्य द्वितीयवल्ल्याश्च समनास्य यं बुद्धावरोहणाय संग्रहेणोपक्षेप इति पराचः इति। बालाः सदसत्सार्थविवेकविधुरा जनाः परा-
मा चः बहिर्भूतान् अप्रसंगभूतान् कामान् काम्यंत इति कामाः तान् अनुसृत्य यंति इत्यन्ततः पर्यटंति भ्रमंतीति यावत्। ते एवं पर्यट-
२ तो बालाः विततस्य नानारूपधरस्य सामर्थ्येन स्वविषयेषु सर्वत्रापि युगपदेव स्वस्वरूपप्रदर्शनकतया विस्तृतस्य विवि-
धमंदादिहारप्रपंचं व्याप्नुवतोऽतिप्रबलस्य मृत्योः परेतराजः पाशं रज्जुरूपं बंधनं यंति प्राप्नुवंति। अत्र पूर्ववाक्येन परा-
चः इत्यादिना संपरायः प्रतिभाति बालं प्रमाद्यंतं वित्तमोहेन मूढं इत्यस्य यं धीराः पंडितंमन्यमाना इत्यादिमंत्राणां द्वितीयवल्ली- एम॰
स्थानामर्थः संग्रहेण परिगृहीतः। अयं लोको नास्ति पर इति मानी पुनः पुनर्वशमापद्यते म इति मंत्रार्थस्तु द्वितीयवल्लीस्थः। ने ६०

मृत्योरित्याशिवाक्येन परिगृहीतः। अथ द्वितीयवल्ल्यां बालमापद्यते इत्येकवचनेनोपात्तस्य बहुवचनान्तेन कथं परिग्रह इति
चेत् द्वितीयवल्ल्यां बहुत्वेनाम्नातः स्वयं धीराः इति बहुवचनेनोपक्रमात् उपक्रमानुरोधेनोत्तरत्र पठ्यमानस्य बालमित्याद्येकवचन
स्य जात्यभिप्रायेणानेयतया न कश्चनात्रावतरतीति विभावनीयं। अत्र बाला इति प्रथमान्तस्य वाक्यान्ते पाठः कामपारव
श्येनाख्यातत्वात्तस्य सूचयितुं। अथ द्वितीयवल्ल्यां अयं लोको नास्ति पर इति मानी पुनः पुनर्वशमापद्यते मे इति प्रतिषिद्धकर्म
कर्तृणामेव यमपारवश्यकथनात् स्वर्गाद्यर्थं ज्योतिष्टोमादिसत्कर्मकारिणां यमपारवश्याकथनादिह सदसत्कामा
नुपायिजनमात्रस्य यमपारवश्यकथनमसंगतमेव न हि स्वर्गार्थं प्रवृत्तिमार्गप्रवृत्तस्य यमपारवश्यप्रकाशिश्रुत्यादि
प्रमाणोपबृंहणेनापि नामेव तत्र तत्र यमपारवश्यप्रकाशनादिति चेत्। अत्र द्वितीयवल्ल्यामन्यच्छ्रेयोऽन्यदुतैव प्रेय इति
पुरुषार्थरूपमार्गपोषकद्वैविध्यविभजनादुत्तरत्र सांपराय इत्यादिना यथेष्टाचारिणां निर्देशात् अत्रोपक्रमगतद्वैविध्यविभागानु
रोधेन यथेष्टाचारस्यापि प्रवृत्तिमार्ग एव सन्निवेशात् निवृत्तिमार्गमपहायान्यत्र मरणसत्वान्मरणाधिष्ठातृदेवताया एवम्
नुपमादिपदेर्थेवहारणं स्वर्गेष्वस्तलोकाद्यधिकारिणामपि मरणाधिष्ठातृदेवताधीनत्वानुत्पन्नतामरणायोग्यत्वादभिप्रा

क॰भा॰ ६१ येशोहसाधारणेनयमपाशबंधरूपकथितं॰ नचैवंसतिस्वर्गाधिकारिषुयमपाशबंधनकथनमसंगतमितिचेत्तन्नहीहयथेष्टाचा
रिणांबंधनमिवस्वर्गाधिकारिणांबंधनमेतन्मयामाणेनोच्यतइतिकथयामः॰ किंतुमरणसमयेप्राणोत्क्रमणादिप्रयुक्तनाना
विधदुःखस्ययथेष्टाचारिणामिवस्वर्गाद्यधिकारिणामपिसत्वेनतदुःखस्यमरणाधिष्ठानत्वेनतात्पर्यतुल्यमूलकत्वात्त
त्रपाशमितिसुखेचदुःखत्वेचदर्परमिवप्रयुज्यतेपाशस्यापिदुःखसाधनत्वेनदुःखरूपत्वात् अथदुःखमितिनिस्पृ
ष्टमनुक्त्वापाशइवपाशइतिलाक्षणिकंपदंकिमर्थंप्रयुक्तमितिचेन्निषिद्धार्थकारिणांमरणपीडावधमयातनापा
अपिसत्वात्तस्याप्युपात्तत्वाद्यामपाशाधीनत्वात्तामपितेनैवरूपेणगृहीतुंपाशमित्युपात्तमितिदिक्॰ अथो इति। अ
थात्राथोपदंकिमर्थकंमंगलानंतरारंभप्रश्नकार्त्स्न्येष्वथो अथेतिकिलसमंतिनन्वत्रैकोप्यर्थःसंगतोदृश्यतेनापि
प्रश्नार्थःसंगतः॰ परोक्षीसारम्भसर्वस्याप्यस्यप्रकरणस्ययमेनैवप्रवर्तितत्वेननचिकेतसामध्येप्रश्नाप्रवर्तनात् अथोइत्यादेःप्र
श्नपरत्वेपूर्वोत्तरसंगत्यापातात्तु अनेनप्रश्नार्थकत्वमपिनापिकार्त्स्न्यार्थकत्वमथोपदेपात्रकार्त्स्न्यस्यधीरेष्वमृतत्वा एम॰
दौचान्वयेप्रयोजनादर्शनात् अथुवेष्विसाद्यवन्वयेदूरत्वदोषस्यापापाताच्चतस्मादिहाथोपदमसंगतमितिचेन्नैवासं ६१

गतं न त्वेके न तत्तत्प्रमाणानुरोधेन पदार्थसंग्रहे कृते सति तावन्नैव पदार्थानामियत्तावा निर्वोढुं संभवति तत्सुहृषाट्षष्ठानां पदा
नामर्थ्यानां च बहुत्वमुपलंभादित्यथा कोशांतरकरणमप्रमानर्थक्यापत्तेः नवा कोशाकारसंगृहीतेन सर्वमपि प्रमाणपुरुषत्वेन
भ्रमप्रमादादिदोषसंभवात् अत एव उंकाररुद्राथ शब्दरुद्राविवेतौ ब्रह्मणः पुरा कंठं भित्त्वा विनिर्यातौ तेन माङ्गलिका
वुभावितिस्मृतेरेधिवृद्धिरादैदिदृष्टोनचरथोकारपरकावर्णस्य मंगलप्रयोजनकतायाश्चैर्वदृष्ट्यापनेन मंगलार्थेन तएर
भेति मंगलार्थकत्वमप्यपरस्यहनिबध्यमानभ्रममूलकमेव सिद्धं भवति एवं गायत्री बालपत्रः स्यात् वदिरो दंतधावनरु
तिरवदिरप्रकरणे पत्रपदस्थाने पुत्रपदभ्रमेण गायत्री बालतनयः खदिररुद्रितिलपोपभूतनतनय पदनिक्षेपोपि भ्रममूल
क एव एवं तत्रतत्रकोशकर्तृणामपि प्रमेयाभ्रमप्रमादादिसत्वात्तैः परिगृहीतार्थावलंबेन नैव निर्वाहो भवितुमर्हति एवं
चप्रकृते ज्योपदेन पर्स्यांतरपं । अथ षेषु ज्योतिरर्थेषु विष्णुज्योतिरर्थेषु सर्वज्योतिरिस्वाराद्वयपदेन ज्योतिरिति प्रागः पक्षां
तरमिसपक्षे स्वीकारेणोहापि धीराननप्रार्थयंते इति कल्पांतरप्रदर्शनजनकल्पादिस्वन्चपोपपत्तेः सर्वसमंजसमेवेति दिक् ॥ अ
प्योमहत्त्विमार्गेत्पूर्वोपान्तादिदंपर्णांतरं निष्टित्तिमाशंत्लक्षणं न दैवप्रकल्पयति धीराः इति । धीराजनाः अप्रमत्तत्वमोक्षं भुवना

कृ० भा० ६२ श्यादिचांचल्यरहितं विविदित्वा तत्तादृशप्रपंचे अध्रुवे पुनः शारीरिचांचल्यवत्तु स्वर्गे सत्यलोकादिलक्षणे सुखं किंचिदपि वस्तु विश्वा
रत्वात्तेन सारभूतवस्तुनः प्रपंचभिन्नत्वात् प्रपंचसामान्यजिहासया दृष्टतरया न प्रार्थयंते नेच्छंतीत्यन्वयः अत्र मोक्षस्य
श्रवणादिभिर्वैकुंठलोकारामास्वाद्यत्वात् सांसारिकसुखस्य च सद्य एवानुभवगोचरत्वात् तस्य क्षुद्रत्वेपि निरतिशयानंद
रूपमहापुरुषार्थरूपमोक्षानुभवाभावेन सांसारिकसुखलाभे सांसारिकसुखादावनित्यत्वविरसत्वादिबोधकसत्प्रमाणा
जनितवासनापरिपाकात् संजातं धैर्यं हेतुरिति सूचनाय प्रथमं धीरा इति पठितं अथोपरंतु सामान्यरूपेण तत्त्वेषु ज्योतिरि
त्यादिवत्सक्षणे तत्त्वलघोतकत्वात् सर्वोत्तो निबद्धः एवं अमृतत्वं ध्रुवं विदित्वेत्यत्र चपक्रमे सति विदित्वेत्यस्य ध्रुवपदार्थरूपा
र्थः परार्थो नरवरस्मृतत्वे नैव प्रसिद्धयेन तस्मिन् ध्रुवत्वमात्रं हेयं स्यात् अतोमृतत्वलक्षणधर्मिस्वरूपमपि प्रमाणतो गुरूप
देशबलेनैव ध्रुवत्वादि विदित्वेत्यपि विविक्तसूचनाय ध्रुवत्वादिति रिक्तानामानंदस्य प्रकाशत्वादिगुणानां चोपसंग्रहाय पचेति निर्गाया
एवमध्रुवेषु मध्ये किमपि न प्रार्थयंते इत्यत्राव अपापेक्षित तस्य किमपीत्यस्यापाठोऽयं येनापि प्रपंचगतपदार्थेषु मोक्षसाद राम० ६२
श्येन संभावितमनोति दुःखरूपत्वाज्जघन्यत्वमप्रपंचांतर्गतत्वसामान्यमिति सूचनाय अध्रुवेष्विति निर्धारणे सप्तमी तेषु

मध्येइतिनिर्दिष्टासामर्थ्यात्किमपीतिविशेष्यंप्राक्समुपतिष्ठते॥अथेहेतिपदंकिमर्थकंपदंवेहसाद्दाविवक्षितंजीवार्थकंकिंवाय
मस्यवक्तृत्वान्नदृष्टान्तल्लोकस्यतत्त्वेसस्ष्यगोचरत्वेनयमलोकार्थकंकिंवामनुष्यलोकार्थकं॥अथवाप्रपंचसामान्यार्थकंनत्रन
जीवार्थकमिहेहपदंभवितुमर्हति॥अर्थासंगसात्॥अध्रुवेषुपदार्थेषुमायिकेषुजीवेकिमपिनप्रार्थयंतेइत्यत्रजीवेइत्य
स्यान्वयालाभात्।नापियमलोकार्थकमिहपदंयमलोकेनप्रार्थयंतेइत्युक्तेलोकांतरेनुप्रार्थयंतइतिविपरीतार्थबोधस्या
त्।एवमेवमनुष्यलोकार्थकत्वमपीहपदस्यविपरीतबुद्धिजनकत्वप्रसक्त्याप्रसाख्येयं।यत्तावत्प्रपंचसामान्यार्थकमिहप
दमिह।प्रपंचेऽध्रुवेषुपदार्थेषुमध्येकिमपिनप्रार्थयंतइत्यर्थइतितत्रावश्यंसंभवति।प्रपंचसामान्येइत्यनुक्त्वाप्यध्रुव
त्वेनप्रपंचांतर्गतसकलवस्तुपरिग्रहाआद्वैतवाद्यभिमतार्थसिद्धिरितिचेत्तत्स्यंपदंतुमायिकजडवर्गसामान्यस्यचेतनस्यतिरस्क
रणात्।दृष्टत्वेनचैतन्यापेक्षयासत्त्ववर्त्तित्वाद्वास्यंद्वियादिप्रसिद्धप्रमाणानामगृहीतशाकल्यात्प्रपंचगताध्रुवत्वादिलक्ष
णांवैरस्यंसर्वेषामनुभवसिद्धंनतत्रकश्चनसंदेहइतिसूचनायेहस्य।धिकमपिपदमुपसंगृहीतमितिदिक्॥अथपरांचिपराद्वइति
मंत्राभ्यांद्वितीयवल्ल्याआरंभस्यच्छ्रेयो॥विद्यायामितिप्रकरणाद्दर्शितोपात्तप्रवृत्तिनिवृत्तिमार्गयोर्विद्वेतत्वात्तद्द्वितीयवल्ल्यामेवप्रदे

क॰भा॰
६३

त्तिनिवृत्तिमार्गविभजनानंतरं समाम्नातयोऽस्त्रं दुर्दर्शो मेतच्छ्रुत्वेतिमन्त्रो मेहाखंडार्थतात्पर्यविधारयितुं तृतीयं मंत्रदर्शोपामात्य
यनुरूपमिति ॥ अयं च मनुरेतद्वैतरीति ब्राह्मणविवरणप्रसंगे न प्रागेव ब्राह्मणपरिच्छेदे कृतविवेचन इति तत एव सर्वेमनु
संधेयं नानयोर्मिराणां तत्पदार्थेन रूपादिजानाति एतेनैव शोधितं तत्पदार्थे नैव जानातीत्यत्राखंडार्थे घटक शोधिततत्पदा
र्थयोरन्यतरस्यान्यतरस्यातः किं वाधिकमत्र प्रतिपाद्यते नकिमपीत्यर्थः विस्तरभिया धिकमिह न विचारितमितिदिक् ॥ अथ
चतुर्थवल्ल्यादिपठितानां मंत्राणां द्वितीयवल्ल्यादावस्य च्छेदप इत्यादिप्रकरणाविचारितप्रवृत्तिनिवृत्तिमार्गयोः संग्रहेणविहितत्वा
त द्वितीयवल्ल्यामेव प्रवृत्तिनिवृत्तिमार्गविभजनाद्यनंतरं पठितयोरस्त्रं दुर्दर्शो मेतच्छ्रुत्वेतिमन्त्रोरखंडार्थतात्पर्यकयोरिह
च तुर्थवल्ल्यां येन रूपं रसमित्यादिनाजीवेशसम्मानाधिकरण्यपरेण तृतीयेन मन्त्रेणापप्याकमेवविहितत्वात् द्वितीयवल्ल्या
मेवेतच्छ्रुत्वेत्यनंतरमन्यत्रेति नाचिकेतस्य मंत्रस्य प्रश्नपरत्वात्तद्व्याख्याने प्रयोजनाभावात् मरणोपासनायाश्च तत्र
प्रश्नानंतरं तानंगत्वेन निरूपितत्वे पितस्य अखंडार्थप्रस्तावे संगत्यभावादतिस्थूलत्वेन विषयसौक्ष्म्याभावेन सत्व एम॰
रेत्यनुशाकत्वेन तद्विवरणप्रयोजनाभावाच्चुतावदंशपरित्यज्य न जायतइत्यादिना प्रकारेणानप्रस्तुतं शोधितत्वंपदार्थास्म ६३

कार्यांतरासंवरार्थं संग्रहेण सपुत्रिकं दर्शयितुं पथ्याक्रमं चतुर्थे मंत्रे प्रवचने यामा सस्वप्नांतमिति अत्र द्वितीयवल्ली स्थ न जायत
इत्यादि ~~[illegible]~~ प्रकरणाविचरणापरोयं स्वप्नांतमितिमनुरितिस्पष्टीकरणाय द्वितीयवल्लीपठि
तममारीरं शारीरेषिसारिमंत्रोनराईमहांतं विभुमित्यादिकमविकलमेवस्वप्नांतमितिमनावपुनरादृत्वेन पठितं प्रत्यभिज्ञा
तुशानतस्त्वमकरणार्थसंग्राहकोयमनुरितिज्ञानुशाकल्लात् । धीरः विषयविवेचनादिना स्थिरमनस्कः स्वप्नांतस्वप्नस्यांतो
मध्यंतं जागरितांतं च जागरितस्यांतो मध्यंतं च माव उभौ द्वावपि येन जीवत्वाध्यासाधिष्ठानभूतेन चैतन्येन अनुपश्य
ति अनुपश्यद्बुद्धिवृत्तिप्रतिफलनोत्तरं पश्यति साक्षात्करोति तं महांतं सर्वे जडप्रकाशकत्वेन जडैः सर्वैरपि स्वप्रकाशत्वा
पच्चैतन्यस्य प्रार्थनीयतया प्रकृष्टतमत्वात् बृहत्वाद्वा महांतं विभुं व्याप्य कं सकलप्रपंच निर्वाहकसामर्थ्यशालितया
प्रभुं वा आत्मानं सर्वप्रपंचाभिन्नत्वेनाभिन्नोपादानतया प्रवेसनाप्रदत्वे नात्मानं मत्वा सम्प्रयुज्य भिर्विचार्य येन शोचति
शोकातिगो भवति तरति शोकमात्मविदिति श्रुसंतरादिति प्रयोजनाः । अथ पूर्वेवाक्ये पल इसत्वेन न तस्य दर्शाकाक्षायाः स
मुत्थितत्वादपेक्षितमपितसंदंकुतोन पठितं अध्याहारे च न स्यैव दोषत्वादिति चेत् स सं परं तु तस्य द्रष्टव्ह लोऽस्वप्नांतजागरितां

कृ०भा० तोभयदर्शनसाधनत्वगुणमात्रविशिष्टस्यैव परामर्शः स्यात् तथामामृतगुणांतरैर्नानाविधैर्विशिष्टस्याप्युत्तरवाक्ये परामर्शो
६४ स्त्विस्यभिप्रायेण तस्य दृश्यापेक्षितस्याप्यपाठः फलत्वत्वाच्च नाध्याहारे दोषाय। तानि च गुणांतराणि मुमुक्षुदृष्टतद्दर्शनसाध
नत्वतत्त्वदृष्टिमप्रतिफलितसुखरूपत्वस्वप्रकाशरूपत्वादीनि भवंतीति मुमतिभिरूहनीयं। अत्र महांतमिति परस्य व्या
पकत्वार्थकत्वेसत्यव्यापकत्वादेव प्रभुत्वापरपर्यायं विभुत्वसामर्थ्यशालित्वं आनंतशक्तिमत्वमिति यावत् समर्थ्यशा
लित्वेनाकुंठभावादेव सर्वप्रज्ञाप्रदत्वलक्षणमात्मत्वमिति क्रमेण महांतमिसारीति पदानि पठितानि महांतमित्यस्य
पूज्यपरत्वे तत्र हेतुर्विभुत्वं निरंकुशप्रभुत्वं व्यापकत्वं च तत्र हेतुरात्मत्वं सकलप्रपंचाभिन्नोपादानत्वलक्षणं सकल
सत्ताप्रदत्वादिरूपमिति महांतमिसारिपदानां क्रमेण पाठः। ससंतथापि प्रयोजननिमित्तादिविशेषनैनैते दोषाः प्रा
दुर्भवंतिन यादिघटपटयो भावानये साहाय्यपतत्वान भेऽन्यतरानयनप्रसक्तौ यथातत्राभावित्यधिकपदे नान्यतरा
लाभादन्यतरस्यैवानयनं वार्यते तद्विलावच्छिन्नमेवानेयं नैकमेवत् क्षुमप्यंकं परिहार्यमेवमितिथा ञापि स्वप्रांतजागरि एम०
तेतयोरन्यतरप्रकाशनबाधकेऽन्यतरदेहप्रकाशयतीति शंकाव्यावृत्त्यापितुमुभावित्यधिकमुपात्तं। एवमन्विति पदमप्य ६४

भिमतार्थे सप्रपंचकत्वेन सार्थकमेव येनेति पदेन शोधितत्वंपदार्थलक्षणकूटस्थस्वरूपस्य परिग्रहेणानुवृत्तिनिषेधस्यानंतरं च
त्रिनाशानंतरं च वृत्तिनदभावप्रतिकं येन साक्षिणा पश्यतीत्यर्थात्। एवं स्वप्नांतजागरितांताविति समासानादरणं समुच्चितत्वे
नैव दर्शनकर्मत्वभ्रमः स्यात्तन्माभूत् किंतु समुच्चितसमुच्चितं वा सर्वमपि दर्शनकर्मेति सूचनाय। अत एवोभाविति नेन समुच्चयो
क्तः असमासेनासमुच्चयोपाशास्त्रगम्यतो संमतो भवतः॥ एवमंतग्रहणं संधिमभिवदतीति तथा च स्वप्नजागरितादिसंध्यादिकं
येन पश्यतीत्यर्थ इति सार्थकमिहांतग्रहणं॥ द्वितीयवल्यां जीवशोधनपरमंत्राणां न जायत इत्यादीनां विवरणायास्य मंत्र
स्य प्रवर्तितत्वेन न त्वाशरीरं शरीरेष्वनवस्थेष्ववस्थितमिति समाम्नानानामनवस्थेष्विति पदोपात्तानामवस्थाजाग्रदाद्यानां सं
तियेषु संधिस्थानेष्विति दर्शितविरामत्वसूचनायांतरालत्वात्संध्यानान्नामिह जागरितांतस्वप्नांतपदेन परिग्रहात्तथा व्याख्यानव्याख्येययो
ः समानार्थकताया एव समुचितत्वादनवस्थेष्ववस्थितमित्यस्यैकवाक्यार्थत्वेन स्वप्नांतमित्यादिनातस्यैव विवरीतुं समुचितत्वा
त् महांतमित्युत्तरार्द्धस्याप्युभयत्रापि समत्वेन व्याख्येयव्याख्यानयोः एतदुत्तरार्द्धं तूर्ध्वस्थानस्थयोः स्थानसाम्येन समानार्थकता
दृढीकरणात्। न जायत इत्यादीनामन्येषामंशानां सुगमत्वेनानवस्थेष्विस्यस्यैव विवरणानपेक्षणात्। एवं विधारण्यश्रीचर

क॰भा॰ गौरपि कूटस्थदीपिकायां चिदाभासविशिष्टानां तथानेकधियामसौ ॥ संधिं धियामभावं च भासयन् प्रविविच्यतामिति त्विन्ति संधिवृत्स
६५ भावप्रकाशकतया कूटस्थो निर्विकारितो भवतीति रिकूः। एवं च तुर्थेवस्मामेव य इमं मध्वदं वेदेति मंत्रे जीवमीशानं वेदेति सामानाधि
करण्येन सम्भवत्यपि तत्रांतिकपदस्य त्वात् जीवेश्वरजीवात्मिके ईशानं वेदेति भेदवादरएव प्रसज्येत अत स्तन्निवारयितुमंतिकपदस्या
न्यथायोजनं सूचयन् मंत्रेनान्यर्थज्ञापनायैतद्दैनरिति ब्राह्मणान्तर्नीयोगुरूदरापि पपाठ। तत्र राजायने यस्य ब्रह्मचक्षुस्तं च
कृतंपिबंताविति मंत्रपरिगृहीतमीशं जीवं चोपादाय जीवप्रोभयशोधनपूर्वकं जीवेशसामानाधिकरण्यं प्रदर्शयन् दर्शन
फलं गौणं किंचित्संच भिर्मेन् भिर्दर्शयन् तेद्याघमनुदर्शयति य इमामिति। जीवमीशानं यो वेदसनतो न विजुगुप्सत इसन्व
यः अनेन सामानाधिकरण्येनास्वेदरार्थः सिद्धो भवति। अथ जीवमीशानं वेदेति यदीह सामानाधिकरण्यं विवक्षितं तर्हि जीवे
शानपदोत्तराले तिकादितिपदं समीपार्थकं नैवसंगतमाभातीति चेत् संगतमेव अंतिकादिति पदं मध्यमणिन्यायेन जीवेशानो
भयान्वयि। एवं चानेन कृतंपिबंताविति मंत्रार्थः प्रसभिज्ञापितो भवति। तथा चांतिकात्समीपे यस्य ब्रह्मचक्षुस्तं चोभे भवत राम॰
उदन्तः मृत्युपेस्योपसेचनं। कृतं पिबंताविति समुपात्तेमध्वदं पश्चिवमधुमधुरं अवश्यभक्ष्यं तदत्रीतिमध्वदं जीवमीशा ६५

नंचात्मानंस्वरूपंशोधितत्वगात्मनावेदेत्यर्थः तेनकृतमितिमंत्रोजीवेशपरः यस्यब्रह्मेतिमंत्रः शुद्धाधिष्ठानकेश्वरपरइतिसू
चनपूर्वकंजीवकंजीवेशयोः शुद्धात्मत्वनिर्देशलक्षणशोधनपूर्वकंजीवेशसामानाधिकरण्यपत्रोऽखंडार्थः सूचितोभवति।
अथपूर्ववाक्येषुस्वस्वरूपेउत्तरवाक्येऽनियमेनतत्परमपेक्षितमितिन्यायादुत्तरवाक्योच्यमकंतेनतत्पदानुपादानेनन्यूनतादोषइतिचेत
नुपपोजनविशेषलोभेनत्वंनिर्देशेबाधकाभावात् अत्रतसइत्यग्रहणेनाखंडार्थेवेत्युक्तेनोत्तरंनमुख्यंवक्तव्यमितिज्ञाप्यन
इतिदिक्। ईशानंभूतभव्यस्येति अथभूतंचभव्यंचभूतभव्येनयोः। शासनमितिद्विवचनेनसमुच्चितेनसत्येकवचनोपादानंकिं
न्निबंधनं। ईश्वरस्यभूतभव्यप्रपंचेऽववर्तमानप्रपंचेपीशत्वाद्वर्तमानांशस्याग्रहणंचकिंनिबंधनमितिचेत्सत्यंद्वंद्वोना
त्रविवक्षितः येनभवदुक्तोदोषस्स्यात् किंतुकर्मधारयएवविवक्षितः भूतंचतद्भव्यंचभूतभव्यंतस्यभूतभव्यस्यभूतंसद्य
द्भव्यंतस्येत्यर्थः संयन्ताभवति अनेनवर्तमानमपिचराचरात्मकंजगद्भूतंसद्भव्यंभवतीतिसर्वस्यापिभूतभविष्यद्वर्तमाना
त्मकस्यप्रपंचस्यपरिग्रहोऽत्रइतिनन्यूनतावतरतीतिप्रपंचोपमनाक्षिप्तोरम्यानुवर्तमानइतिचसूचितंभवति।। नततइति
ततोवरनकर्मीभूताखंडार्थज्ञानंतज्जनोनविजुगुप्सते। संसाराविष्टमात्मानंननिंदतीतिसंसारिजनइवतानमात्रादेवबंधनिव

ई॰भा॰
६६

साजुगुप्साविषयस्यैवालोकत्वात् ज्ञानानुदयेनुषंघनसत्तान्नचिह्नसुपायपत्नानुन्मुखत्वा जुगुप्साविषयआत्मा विषयवैराग्यानिश्चा ३
येनभवेन् आत्मानेजुगुप्सेदितिश्रवणात्। अत्रान्यवहितत्वाय मात्मास्वरूपार्थस्य परमार्थोयस्वर्वोहितत्वदेसर्वेनामविशेषस्याभा
वात्पठितुसमुच्चिनेपिनत्रः क्रियासविधेपाठेसमुच्चिनेपिव्यसयेनपाठः जुगुप्साभावस्तत्वहृजनसामान्यानुभवसिद्धइतिस्य
चेनाय॰ अतत्वज्ञोविविधंजुगुप्सते। तत्वज्ञानेनुजीवन्मुक्तिदशायांशरीरस्थानकृताजुगुप्साविदेहकैवल्यावधिभवती
॰तिसूचितंविपदेन। अत्रतस्मादित्यनुक्तानतइतिसर्वलिंगसाधारणंनिर्देशात्यः पूर्वेपाप्मानेसार्दावप्रियोवेदसनततो न
विजुगुप्सतेइत्यस्यानुषंगः सूच्यते॰ तत्रनजायतेयस्यब्रह्मचरूतंपिबंताविति मंत्रपरिग्रहीनजीवेश्वयोः सामानाधिक
रण्येनयस्यरूपमितिमनुतात्पर्येविषयीभूतेप्रदर्शयंतंद्वितीयमनुमात्मनः पूर्वमित्याः परमात्माभूमलक्षणःतपसः
सोकामयतबहुस्यांप्रजायेयेतिसतपोतप्यतसतपस्तप्त्वेतिसमुपात्ततपस आलोचनातः पूर्वंजातंसत्जातिजातंचसा
मान्यव्यक्तिरूपप्रपंचात्मनेतिप्रमाणेनजातात्मकसामान्यरूपमविभक्तनामरूपात्मकाव्यक्तंसत् अद्भ्यः पूर्वंवैदिक राम॰
निर्दिष्टावाप इतिकर्मनामसुपरिपठनात्कर्मभ्यः क्रियाविषयीभूतप्रपंचलक्षणेभ्यः पूर्वमजायतनतुन्मुखोऽभिव्यक्ति ६६

मित्तोपादानात्मनाऽसृष्ट्यादिसमर्थः। योवेद निहितंगुहायांपरमेव्योमन् तस्माद्वाएतस्मादात्मनआकाशः संभूत इत्यादिः तैत्ति
रीयश्रुत्यात्मादिसृष्टिद्वारा प्रतिपादितान्नमयादिलक्षणगुहां प्रविश्यप्रतिष्ठितं आत्मेंद्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिण
इतिप्रकृतश्रुतिप्रतिपादितेजीवेभूतेभिर्भूतैर्भूतेः पंचभूतैर्भूतकार्यैर्वेंद्रियैःसहव्यपदेशविशेषेण व्यपदेशप्रकाशप्रापनि
स्म अधिष्ठानचैतन्यरूपेणास्फोरयतिस्म। अत्रात्मने पदं छांदसं। अत्र पूर्वेमंत्रे आत्मनततो विजुगुप्सत इति चरणस्यानुषं
गः तथाचयोऽजायत योऽव्यपदेश्यततो न विजुगुप्सते योवेद स इति च पूर्वस्मादनुषज्यायोजनीयं। अत्र यः पूर्वं जातेमत्रि
तिनिर्देशात् सूक्ष्ममेवनिजरूपं अव्याकृतनामरूपत्वाद्गनुक्तमिति सूचितं। यस्यब्रह्मचेति द्वितीयवल्यंतमंत्रे सहमत्वप्रतिपादनेन
सृष्टिस्थितिसंहारविषयसूचनात् सूचितः सृष्ट्यवशेषः पूर्वमिति पूर्वोक्तेनेहप्रकाशितो भवति। अत्र तज्जायते प्रियतेय यस्यब्रह्मचे
ति द्वितीयवल्यां जीवे ग्राममनुसमभिव्याहारलभ्यात्वदर्थप्रकाशयितुमादिति प्राणनिगरणादिना ध्यारोपप्रदर्शनेन पू
र्वेक्रमप्रवाहप्रदर्शनेनात्वदर्थघटकीभूतजीवेशसामानाधिकरण्यं सूचयतियाप्राणेनेति। तत्रप्राणेनेतिपदेनेशोत्पत्स्य
ते अस्य मंत्रस्य तज्जायत इत्यादि जीवप्रकरणपस्यब्रह्मचेति परमेश्वरमंत्रं च परिगृह्यप्रत्यक्त्वेन तत्रेप्रास्यपस्यतिभोक्तृ

क॰भा॰ ६७ त्वनिर्देशेन क्षुत्पिपासयोः प्राणधर्मत्वात् । यस्येति यत्सहार्थे परमेश्वरे प्राणरूपेण स्वच नादस्य मंत्रस्य न ह्यात्मा रूप
त्वेन यस्येति मंत्रस्य चिन्मात्ररूपेण विवरणं यत्प्राणपदस्यैवेहाचिन्तत्वात् यत्कामकलामिश्रबिंदुप्रधानात्प्राणेन प्रो
न संभवति प्रपंचाकारेण जीवोपाधिभोगसाधनादिरूपेण । प्रसिद्धकल्पयभार्यापि नाम्नाः इति तस्यादेवयोनित्वात्
वामनेश्वरादिजनकत्वाद्देवतामयी च भवति । अथात्मनो जीवेशाभेदो न सूच्यते किंतु कुंडलिनी शक्तीप्राणयोरेवाभेदः सूच्य
तइतीह कथमखंडार्थः सूच्यत इति चेत् सत्यं परं तु जीवाधिष्ठानभूतशक्तेरीशाभेदकथने जीवस्यापि प्रसक्तिपरंपरेण पर्यवहसं
भवादभेदेनाखंडरूपो जीवेशयोः सूचितः कल्प एव भवेत् । अरापो जीवेशयोर्निहितः शुद्धेनाखंडेन भूम्नाखंडात्मना प्रतिबिंबा
वच्छेदाभ्यां तयोस्त्यागेन स्थापितः । ज्ञातवेदाः ज्ञानमखंडाकारवृत्तिलक्षणं बोधं स्वाभिव्यक्तिद्वारा प्रकाशकत्वेन वेत्तीति जातवेदाः
अखंडार्थः अनेन जीवेशापाधनं । ध्यानादिलक्षणानि मंथनेन परिसाजित मायाविद्योपाधिद्वयं विशोध्य चैतन्यांशमा
त्ममखंडाकारवृत्त्याभिव्यक्तमिति सूचितं । जागृवद्भिः प्रमादालस्यादिरहितैः प्रमादं वै मृत्युमहं ब्रवीमि सदाऽप्रमादममृतत्वं ब्र राम॰
वीमिति सनत्सुजातादिवचनपरिपाघातस्मृक्षेन्न प्रमाघतीत्यादिश्रुत्यनुगृहीतया वर्तमानैः हविष्मद्भिः खंडाकारवृत्तिवर्द्ध ६७

नानुकूलश्रवणमनननिदिध्यासनादिसाधनग्रामसहितैर्मनुष्यैर्मियोगिभिः सुमहतोपवर्द्धितो दिने दिने देय्यस्तु सोतिपरिपाकेन
प्रशास्यतमः अग्निः अग्निरिव तूलस्याविद्याकामकर्मादिबंधस्य दाहको भवतीति। आत्मानमरणिं कृत्वा प्रणवं चोत्तरारणिं।
ध्याननिर्मथनाभ्यासात्साक्षाद्दहति पंडित इति कैवल्ये। आदिसोष्यादिभूतत्वादिस्यादिसूर्यमसि ह्रांतवच्च नानुसारेणायोगमयोर
याप्रसिद्धस्य स्वेनिगरणेन वास्तव्यः अप्रतिहततेजाः परमेश्वरो मायोपाधिकः स्वतोऽखंडचैतन्यादुदेति मायोपाधिवशातोऽ
भिव्यक्तः सत्वाद्यनुरूपो भवति यथा खंडचैतन्य एव अस्तत्सत्वाद्यनुरूपावस्थानेऽभिव्यक्तं नागच्छति उदितं दुर्वि
अखंडार्थस्वरूपंहि कस्यचनकोपि जीवः उपासनादिसिद्धोपिनास्येति नातिक्रामति नदुर्लभनान्याप्यपंप्राप्नोतीत्यर्थः तत्र
हेतुमाह नपितिदेवाः सर्वेपि दीप्यंते प्रकाशंते ह्यानस्वरूपत्वादिति देवाप्रकाशात्मानो जीवाः नमेव परमेश्वरमेव समर्पिताः कि
ल अनुप्रवेशिनाहि जीवोपाधिमविधायापरिहृ सोपासकैरूपासनापरश्रुतितत्वविद्भिर्गुरुभिस्तत्वावेदकैः स्थूलमस्यहं ब्रह्मा
स्मीति श्रुतिशिरवचनैः स्वस्वरूपचैतन्यात्मनानिरूपिता हीति यावत्। एवं चेद्रामपि को पिनातिक्रामति चेद्दीप्राधिष्ठानचै
तन्यंनुसृतरंको पिनातिक्रमतीति सिद्धं भवति। अप्ययत स्थुपत्र चेति चकार द्वयमप्यसंगतं अग्निर्द्दीरिनविरुद्धार्थसामान्य

कं०भा० ९८ विवक्षयैवयसदसत्सर्वत्रप्रवृत्तेः केवलपसद्दान्वयितया समुच्चयपरचकारसन्निवेशप्रयोगता न च कृतंतमानयेतिप्रयोगाभा
वात् सत्त्वं इत एव हेतोर्यत्परमिदं विशेषपर्यवसायीतिनिर्द्धार्यते । पतोः खंडशु इति यस्मिन् खंडे सत्त्वमेवेतीनिषेध इति एवं च
चकारोपि विशेषांतरे पर्यवस्यतीति निर्णीयते । अथ पूर्वं जीवशब्दसामानाधिकरण्यमहिम्ना खंडशः प्रोक्तापि तेः संप्रति तु
वचननए वाभेदं दर्शयन्न खंडार्थं समभ्याये पुरुषेयभ्यासा वादित्येष एक इति तेनिरीयवाक्ये नेव दर्शयति अपरे त्वेतत्प्रादि
नात्रे हेति पदे सन्निहितापरोक्षपरं तेनाखंडप्रकरणबलेनाखंडार्थं संदर्शनेन चेहेति पदेन विशिष्टजीवः परामृश्य
तेन यत्र चेह जीवस्वरूपेय स्वानुसूत्ते अधिष्ठानभूतसत्ताप्रदर्शैव तन्मयसत्त्वसत्त्वलक्षणावच्छेदेनेन दर्शने तन्मयमनुत्रपरोक्षे
मायोपाधिकत्वादनित्यसत्त्वमत्वाच्च व्यवहितवस्तुस्थितेरीश्वरेणैतत् । उक्तमेवार्थं द्रष्टुं परस्परमधिकांशास्तित्वशंका
निराकरणाय च व्यतीहारेण दर्शयति यदमुत्रेति । अथान्वेवकारं विनाषितिवीहाभवे देव यदिह नानापश्यतिसमस्तो
मृत्युमाप्नुयादिति प्राग्वद्बोधोत्पात् स्युक्तिकां रजतं यः पश्यतिस विकलेन्द्रियादिमानितिवत् । अत एवकारः क्लिप्तमिति राम० ९८
पठित इति चेन्न सत्यं परं तु बहूत्व घटपटादीनां बहुत्वेन पश्यतोः परावादर्शनात्तद्व्यक्तिविशेषयोर्विशेषांशे पि वस्तुतो नाना

मृतपोनोनात्वेनविप्रोष्यां शंपश्यपतोनैवापश्चो स्तीसा शंकास्यात तन्माभूदितीवपरं दर्शितं यथायत्तानायत्नमपराधं स्त्वं चपितुमु
पात्तामसमृसोमर्षं खुगच्छतीति वक्तव्ये सस्त्वस्यमध्येपाठो नानात्वोत्प्रेक्षकस्य नानात्वभ्रमवरूपस्य यापि जघन्यतास्तु नाम। एकं नि
श्चिन्वतः पुनरपिकौतुकतोपि भेदस्य हंगा निपतनस्यातिजघन्यतावहत्वात् व्याघ्रेण प्रथमं समाक्रांतस्य दैववशात्ततो किस
श्चस्यबुद्धिपूर्वकं कौतुकादिनाव्याघ्रमुखसन्निवेशस्यात्यनुचितत्वात्। अथ निरुक्ताखंडार्थे प्रामाणान्येषां साधननां प्रतिक्षिप
न्नसाधारणंसाधनं सपरिकरं दर्शयन्निमनसैवेति दर्शयति रूपैर्वमे नोपात्तं निस्वापरोक्षं प्रत्यक्षपनया साचिद्दिहितं मनसैवप्रांसाहित्यगुण
पुनेनाभ्यंप्रामप्यमखंडार्थसाक्षात्कारेणाक्लिष्टानिवर्तत्वद्वारा कंठचामीकरन्यायेन संप्राप्यं भवतिनान्यैरिंद्रियैस्तौनकमेल
क्षणोः तत्र हेतुमाहनेदृति। किंचनकिंचिरप्यवस्तुदृहनिरुक्ते खंडार्थे नाना अखंडार्थप्रतियोगिकभेदवन्नास्येवा तथाच
यद्यद्वहिरिंद्रियविषयीभूतं भवति तत्तदनेकात्मकं भवतीयथाघटादि तथाचायमखंडार्थो बहिरिंद्रियागोचरः अनेकात्मक
त्वाभावादितिप्रतिज्ञाहेतु तत्रान्वयदृष्टांनालाभात्व्यतिरेकदृष्टांत एव घटादिरितिविवेकः अर्थः। अथाखंडार्थो बहिरिंद्रि
यागोचर अनेकात्मकत्वाभावादित्यत्र ~~प्रमाणसापेक्षलोकव्यवहारः सर्वैरप्यनित्यभेव युरितिकोवधो नमायामस्य~~

हेत्वसिद्धिरंकाकारत्वमप्यो

कं॰ भा॰ ६९ हवरिहहें पिसुराईदप्रवर्त्तितं भवति एवं च पघाखंडार्थो ऽनेकात्मकः स्यान्नहि महाखंडार्थवैतथ्यं रूपितं भेदश्रोतान्नरूपानर्थः
सकलश्रुतिप्रमाणसिद्धो वितथ्यो भवेत महाखंडार्थस्य भवद्रीत्यानेकात्मकत्वेनार्थवैतथ्यस्य तत्राभावात् अतो हेत्वसि
द्धिर्नोक्तोऽकनीयेतिभावः अनेनन पूर्वमेव एवोत्तरार्धस्य गतत्वात्पुनः पाठः पुनरुक्ता वह इति शंका परास्ता तकोवताय
पुनर्ग्रहणात् अत्रेदमितिपदस्य प्रथमान्तत्वात् सर्वनामत्वेन सन्निहितार्थपरामर्शकत्वस्वाभाव्याच्च प्रथममेवप
ठनीयस्य पाठमविधाय पश्चात्पठनीयस्य साधनीभूतस्य मनसेत्यस्य प्रथमपाठो मनः परमिदं न केवलं मनः परं किंतु
नाविरत इत्यादि मंत्रसूचित प्रमाणादि सकलगुणयुक्तं मनः परमिति सूचनाय एवं नेह नानेति नञः प्रथमपाठो नाना
त्वाभावो खंडार्थे सकलमानसिद्ध इति सूचनाय अन्महाखंडार्थमेव पुनरपि विशदयता ह्वन्निरस्त उपदेशादिति न्यायमा
श्रित्य सद्भ्यां मनुभ्यां अंगुष्ठमात्रः उपक्रमे सर्वे वेदा इत्यादावुपासनायाः प्रणवसंबंधिन्याः प्रस्तावेप्यखंडार्थे परप्रकरणे
ऽस्मिन्नुपासनाविवक्षाया अभावात् तं पुरुषपरं जीवपरं ईशान पदमीश्वरपरमिति सामानाधिकरण्यपरेशाद्वादि राम॰
तिच हरिरिति धापहयोरप्येतन्मंत्रयोरंतेन तत्पुरुषहणा एतद्वैतदिति बालत्वांतन्मंत्रद्वयभावप्रकटीकरणाय समपाठि तत्र ६९

यद्यपि मंत्रद्वयमपीदमर्थतः समाकारमेव प्रतिभाति । तथापि न विजुगुप्सते इति एवाद्यस उप्स्वद इति चोक्तेन बिंदाभावस्यावे
कालिकत्वभेदादिना भेदः समुन्नेयः । अथांगुष्ठमंत्रार्थमेवैकदेशेन ययं प्रेते इति मंत्रेऽत्तापितपक्षांतरव्यावर्त्तनपरतया पठ
ति अंगुष्ठेति । अथ येन रूपं रसं गंधमित्यादिमंत्रे षुत्तत्वमर्थपरपदसामानाधिकरण्यादिसिद्धं महाखंडार्थमेव द्रढयितुं प्रव
त्तिमार्गनिरासत्वेन पूर्वोक्तं निवृत्तिमार्गजीवत्वत्त्वदर्शनलक्षणं माहयति यथेत्यादिभ्यां द्वाभ्यां मनुभ्यां । तत्र यथोदकं दुर्गे
इति प्रथमो मंत्रः भेददर्शनलक्षणप्रवृत्तिमार्गनिरासपरः यथोदकं शुद्धे इति द्वितीयो मंत्रः अभेददर्शनलक्षणनिवृ
त्तिमार्गप्रशंसापर इति विभागः अत्रमंत्रयोर्वेष्टमित्यादि कमिति निर्देशाद्देवेनेति पुरुषादिनेत्रिवचकर्त्तपरपदे व्या
ख्याहार्यौ । अत्र पर्वतदुर्गग्रहणं स्थिरतां सूचयितुं उदकग्रहणं तरलत्वेनास्थिरावस्थानं निम्नपतनादिस्वभावं च सू
चयितुं । एवं चोपासनाकर्मसमर्ज्जितसत्यलोकस्वर्गादिलोकेषु स्थिरेषु सत्स्वपि कर्मठोपासकवर्गस्य तत्र लोकेषु क्षणमा
त्रमपि न स्थैर्यमिति सूचनेन कर्मोपासनाफलानामस्वल्पकालावस्थानं ताप्यितं भवति । यद्यपि सत्यादयो लोका दुर्गपर्वता
द्युपस्थ्यास्थिराएव विचार्यमाणे तथापि जलापेक्षयापर्वतादेः कर्मठोपासकस्थित्यपेक्षया सत्यादेर्बहुकालावस्थानमिति वि

कु॰भा॰
८०

वेकः यत्र जलं धावति पुरुषो धावती सुन्मार्दनस्ततो धावनमेव जलपुरुषयोर्नेत्वनिसत्वमितिज्ञापितं भवति। एवं तानेवानुविधा
वति पर्वतेष्विसादिनिर्देशानंतरं उपासनकर्मप्राप्यलोकादधोधस्तनलोकसंबंधिप्रदेशेषु स्थितिर्नोसंबंधिप्रदेशेष्विति ज्ञापितं
भवति। तथा चोरकं दुर्गेयथा वृष्टं निर्मलात्मनावाघ्र भिहतंतेजः संपर्के संजातद्रवत्वादिगुणयोगेन च प्रकारेण दृष्टं सत्।
पथा येन प्रकारेण तत्तद्देशसंपर्कवशात्तोमालिन्यादिप्रकारेण धावति एवमनेन प्रकारेण विधाकर्मेलक्षणा वायुरिव्यतेज
सा ग्वेदार्थेलक्षणा प्रीतलोकादिप्राप्ते श्रेणधोभा गयुनात् विभाजितमाया दुर्गे देशेनेशाबल्ले ननिपातितं प्रथमके बला
स्वेदार्थरूपत्वाच्चिदानंदघनीभूतं तत्र विधाकर्मेवायुरिव्यतेजः संपर्कोद्धिलीन घनीभावं जीवलक्षणो दर्कं महदहंकारा
दिपर्वतेषु तत्तत्स्वर्वतगतकर्मादिधातुभिर्मलिनीभूतस्वरूपप्रकारेणोन स्ततो धावती निगोलार्थः एवमुदकनिष्ठ प्रकारसजा
तीयप्रकारेण मायादुर्गेदेशेन पातितः धर्मान् मायापरिणामेशाविवर्तभूतान् धर्मान् महदादीन् पृथग्पश्यन् पथा योगं कर्म
पासनाभ्यां सा क्षात्कुर्वन् तानेवमहदादीननुसरसेन ततो धावतीत्यक्षरार्थः यथा येन प्रकारेण शुद्धे प्रीतलोके उदकं वा रामं॰
ड्वाग्न्यादितेजसा भृशं संसर्गजमालिन्यापहानेन शासिक्तं निक्षिप्तं सत् यथा येन प्रकारेण यादृगू-मेघमंडलविभागात्पूर्वं घन ८०

मभूत्वात्द्कुघनमेव भवति। एवं अनेन प्रकारेण श्रवणमनननिदिध्यासनानि कुर्वतः जनस्य गुरूपदेशादिजनितसाक्षात्का
रेण निरस्ताविद्यादिसकलमालिन्यः आत्मा। स्वरूपार्थसाक्षात्कारेण तु बोधुपदेशादिजेन प्राप्तिः एवमनेन प्रकारेण सच्चि
दानंदघनीभावमापन्नो भवतीति द्वितीयमन्त्रार्थः। अथात्र दृष्टांतयोर्यथेति निर्देशात् यस्य दृष्टसमभिव्याहारेण तस्य दृष्टैवा
कांक्षितत्वात् आकांक्षितपरोक्षपरत्वस्य रमपहाय एवमिति दार्ष्टांतिकद्वयेपि कथं निर्दिष्टमिति चेत् न समस्तपरंतु प्रकरणत्रिनिवृत्तिमार्ग
गतप्रकारः प्रवृत्तिनिवृत्त्योरनुभवगोचर इति सचनाय एवमिति परस्परानुभूयमान परत्वाज्जेनानुभवस्त्वन संभवात्। अथा
त्रैश्य गीतिपरमनर्थकं धर्मोनुपासनादिनासाक्षात्कुर्वन्निसेतावते वाभिमतार्थसिद्धिरिति चेत् रविभेद जनकेः ज्ञाने नाश
मात्पतिकंगतेः आत्मनो बसरणोभेरमसंतं कः करिष्यतीति विष्णुपुराणवचनानुरोधेन संसरणस्यविभेदत्वानर्थेकल
नियमेन संसरणोभेद एव वसाः इ इतिज्ञापनाय द्वयमिति पठितं एवं च सतिपूर्वोत्तरमंत्रयोः परस्परविरुद्धार्थत्वात् अर्थमंत्रेण
प्रकृतस्वरूपस्य संसरणहेतुत्वेन निर्दिष्टा उत्तरमंत्रेना वरभेद दर्शनं मुक्तिहेतुरिति सूचितं भवति। एवं द्वितीयमन्त्रे एवमुनेरि
त्युपमेयवाक्ये उपमानवाक्यसारूप्यापारस्वरूपार्थ प्रोधितत्परार्थत्वं क्षेत्रेनिक्षिप्त इति विस्पष्ट निर्दिष्टं संमुचितेपि तद निर्दि

क॰भा॰ ७१ शः पूर्वमंत्रपरिगृहीतभेदविरुद्धाभेदपरिग्रहसूचनाय इतरथाऽखंडैकार्थे निक्षिप्त इति निर्देशासति समन्वयाऽऽधारत्वप्रसाधना
द्याधाराधेयभावस्य भेदघटितत्वादीशाधिष्ठानचैतन्यभिन्नं जीवाधिष्ठानचैतन्यमिति भ्रमः संपद्येत एवं च पूर्वमंत्रार्थवि
रुद्धार्थकत्वमुत्तरमंत्रेण समागतमित्यसंगतत्वभ्रमोपि स्यात्। तन्माभूदिति समन्वयं तमखंडार्थे इति न पठितं। अथ द्वितीये
मनौ जीवेशाभेदो विवक्षितः प्रथममनौ भेदनिर्देशोनंतरमिति द्विद्वितीयमनावभेदविवक्षायाः समुचितत्वादिति कथनम
संगतं तथा सत्युपमानवाक्येनादर्शेवेति भेदपरनिर्देशोसंगतः स्यात्। आदर्शोयं देवदत्तादेर्विसदृशं सादृश्यप्रतीतेः
सादृश्यस्य च भेदघटितत्वात्। निरंजनः परमं साम्यमुपैतीति श्रुत्यंतराच्चेतिचेन्न। राजायं पूर्वं यथा सविनयो भूदधुना
पि तथैवास्त्विति वक्तव्ये राजायं पूर्वं यादृशो भूत्तादृश एवाधुनापि भवतीति प्रयोगात्। यथालंतपरस्य प्रकारप्राधान्येन प्र
वृत्तिर्दृगंतपरस्य प्रकारिप्राधान्येन प्रवृत्तिरिति सर्वभेदात्। तत्र परिप्रकरणादिना व्यक्तिभेदः सिद्धस्तर्हि दृगंतयालंतादिप
दृशादृश्यपर्यवस्यति यदि पुनर्व्यक्तिरेकैव तर्हि देशकालभेदावच्छिन्नैकधर्मवत्त्वं बोधयति। एवं च व्यक्त्यैक्येपि तस्यामेव व्य राम॰ ७१
क्तौ कंचन भेदं कथंचिद्बुध्वा परिकल्प्यापि दृगंतादिपदप्रयोगो भवति॥ ॐ अथ पंचमीवल्ली वक्तिरसकृदुपदेशादिति न्याये

नोपदिष्टां खङ्गाध्येत्सा निदिध्यासनोपयोगि मननं संपन्नयेत्तेनोपदेशाद्ध्येयं च समारब्धा पुरमित्यादिभिः षोडशभिर्मं
त्रैः पुरमिति प्रमाता पुरं निदिध्यासनरूपं एकादशद्वारं नित्यानित्यवस्तुविवेकेहामुत्रार्थविरागशमादिषट्कमुमुक्षु
ताश्रवणमननरूपद्वारयुक्तं अजस्य शाश्वताभिन्नस्यावक्रचेतसः जीवस्यात्मखङ्गार्थं राजस्य अनुष्ठायफलत्वात्संसरणान्न शो
चति विमुक्तः जीवन्मुक्तस्तन्न विमुच्यते विदेहकैवल्यवान् भवतीति संग्रहार्थः सार्वोत्कृष्टं प्राप्यते इहंसः शुचिषदिति। हंसो यतो रवौ
श्वेतच्छरप्राणात्मनोः स्यात् इति प्रमाणादिह शुचिर्येषु स्थानिष्ठं गारंडाखाद् शुद्धमंत्रेति॥ ज्येष्ठे च पुंसि धवले शु
द्धेनुपहते त्रिष्विति शुचिपदस्यानेकार्थकमिह विशेषं + भाष्ये कुटिलमेकरूपेण स्थितं नेतो ज्ञानं यस्यानुष्ठा
य ध्यात्वा न शोचति कुतो न शोचति यतो हेतोरिहैव विमुक्तो भवति अविद्याकामकर्मादिभिः मुक्तः सन् वि
मुच्यते पुनः शरीरं न गृह्णातीति उक्तं ॥ तत्त्वज्ञचेतः परस्य मनसि रूढस्य योगे नष्टाने वृत्तिः स्त्रीकरणीया
सा न पुनः रूढा योगिनो ध्याता ॥ यस्य दंपुरं तामित्याध्याहारः प्रज्ञो॥ अनुष्ठायेत्यस्य फलकत्वे लक्ष्यते दोषाप्र
तो अत्र + ॥ विमुक्तश्चेत्येकारेणोकाराभावस्त्वमुच्यते ॥

कृ०भा०
७२

ईशगतमंतर्यामित्वादिकमेवमनसि सत्वारमारोपयितुं कंचिदुदाहरणविशेषं विवेचयति। ऊर्द्धमिति। हंस इति मंत्रे रूतंबृ
हदित्युपात्तमीशास्वरूपं मध्ये प्राणापानयोर्मध्ये मस्तिष्के प्राणापानग्रंथिरूपेणासीनं तत्र विद्यमानं वामनं संधिस्थत्वा
त्किरूपत्वाद्ध्रस्वं हंस इति मंत्रे रूतंबृहदित्युपात्तं विश्वेदेवाः सर्वे ब्रह्मादयोऽपि देवा अधिकारिणः उपासते उपसनं वामन
विषयं कुर्वते। इंद्रियाहंकारबुद्धिप्राणादयोऽपि देवा वामनमुपासते तदाश्रयेणैव तिष्ठंतीति वा योजनीयं। वामनत्वे हे
तुर्मध्यावस्थानमिति वामनमिति प्रागुक्तं मध्ये इति पठितं। आसीनत्वमपि वामनत्वेनं तत्र तिष्ठतामुच्चत्वादुपविष्ट
स्येव वामनत्वभानादेवमासीनत्वेन स्थिरतास्सूचनात्सर्वस्य देहसंबंधिकार्यजातस्य शोनिर्वाहक इति ज्ञापितं भ
वति। अनेन विश्वे इति देवविशेषणत्वेन सर्वत्वनिर्देशात्सर्वे देवा ह्युपास्यत्वेन परमात्मनि वामने समुत्कर्षकाष्ठा ज्ञापिता भ
वति। अथवा पनदेवपदे जीवेंद्रियपरे भवतो हंस इति मंत्र एवेशपरोस्तु ऊर्द्धमिति मंत्रः केवलजीवपरो भवतु अस्ये
ति मंत्रः पुनर्जीवनिरूपणपूर्वकमस्य वर्णार्थस्सूचको भवतु एवं चास्येति मंत्रोक्ते पठ्यमाने एतद्वैतदिति ब्राह्मणमप्यस्ये रम०
ति मंत्रस्सूचितजीवेशसामानाधिकरण्यप्रकाशकं स्यात् संगतं भवतीति चेत् न जीवस्य स्वेच्छया स्वातंत्र्येण प्राणापाना ७२

रिनियंतृत्वबाधात् जीवस्य स्वातंत्र्ये च जन्ममरणादिकं दुःखाकरं न गृह्णीयात् आत्माप्यनीशः सुखदुःखहेतो
रितिश्वेताश्वतरश्रुतिरपि क्लिश्येत। अथ शेषविवेचनस्याखंडार्थपरत्वात्फलीभूताखंडार्थपरं मंत्रं पठति अ
स्येति। अस्य देहतादात्म्याभिमानिनः विस्रंसमानस्य भाग्यवशेन साधनचतुष्टयसंपत्त्या देहतादात्म्याभि
मानरहितस्य साक्षात्कारविगलिताविद्यस्य शरीरस्थस्य तादात्म्याभिमानाभावात्प्रारब्धसमाप्तिपर्यंतं गृहे
पुरुषस्येव पृथक्कालं मतोऽपि देहे स्थितस्य देहिनः भूतपूर्वगत्या देहाभिमानिनः जीवन्मुक्तस्य देहाद्वि
मुच्यमानस्य स्थूलसूक्ष्मलक्षणात् पृथग्भूतस्य विदेहकैवल्यं प्राप्तस्य अत्र देहस्य ऊर्ध्वमिति मंत्रोक्ते शेषाधि
तेशास्वरूपे किं परिशिष्यते शेषाधिनजीवस्वरूपाद्धिकं किमपि न तेन जीवेशसामानाधिकरण्यं घटत इति संग्रहार्थः।
अत्र किमिति पदं जीववस्तुपरं यद्रहितं हि काकाक्षवद्योजनीयं किं परिशिष्यते न किमपीत्यर्थः। यद्वा किंपदमव्ययमाक्षेपप
रं। अत्रेशाधिष्ठानस्वरूपे जीवाधिष्ठानस्वरूपात्परिशिष्यते किमित्यन्वयः। अत्र परिशिष्यत इत्यस्य विशेष्यत्वेन किं
मपीत्यध्याहार्यम्। एवं चातिरिक्तं किमपि नास्ति पारमार्थिकविशेषीभूतं चैतन्यस्यैकत्वादिति ज्ञात्वार्थः। अत्रात्र किं

क०भा० परिशिष्यत इति वक्तव्ये सति किमत्रेति किंपदस्याशेपाठः किमिति परं वस्तु परं ब्रह्मीवे प्रथमं तस्मिति ज्ञापनाय। किंपदम
७३ व्ययमास्ते पपरमिति प्रश्ने सर्वथातिरिच्यमानांशेनेस्य दृढीकरणाय किंपदस्य प्रथमपाठ इति विवेकः। अथ प्रा
णापानसंबंधो वा मनःप्रश्नायः किमर्थमीशः स्वीक्रियते प्राणापानबलेनैव जीवो जीवंति स्थलिसाशंके शंप्रा
णापानसंबंधाव्यभिचारं साधयति। न प्राणेनेति। कश्चन कोऽपि मर्त्यो जीवः न प्राणेन जीवति नापानेन जीवति।
अत्र एकोऽपि जीवः प्राणापानाभ्यां न जीवतीति कथनेन प्राणापानयोः सामर्थ्याभावे प्राप्तिनेति ज्ञापितं भवति
तु शब्दः प्राणापानबलक्षणस्य घोतनाय। इतरेण तु प्राणापानसंधिगतेना व्यभिचारेण वामनेन तु सर्वेऽपि जी
वा जीवंति। अत्र बहुवचनेन प्राणिनिरतिशायसामर्थ्यप्रदर्शितं भवति। इतरः कः इत्यपेक्षायामाह यस्मिन्निति
यस्मिन्संधिगे एतौ प्राणापानावुपाश्रितौ स्तस्तेनेतरेणेत्यन्वयः। अत्र मर्त्यो जीवति कश्चनेति क्रियापदानं
तरं किंपदपाठो मर्त्यातिरिक्तानामपि देवादीनां कश्चनेत्यनेन परिग्रहसूचनाय तेन मर्त्यादिषु कोऽपि प्राणापाना राम०
भ्यां न जीवतीति ज्ञापितं भवति॥ न प्राणेन नापानेनेत्यत्र नञोः प्रथमपाठः प्राणापानयोर्जीवनमुख्यसा ७३

धनलाभावनिष्फलप्रसूचनाय॥ अत्र न प्राणापानाभ्यां मर्सो जीवतिकष्टेनेति लघुनिर्देशो संभवति न त्वद्रूपमुपादायवाक्यभे
दलक्षणगौरवादरणं व्यानादीनां मिंद्रियादीनां चान्यपारीसानिषेधोल्लापनीयोभवतीति विवेचनीयं॥ अत एव न प्राणेन ना
पानेनापीति समुच्चयपरपरस्यापाठः संगतो भवति समुच्चयपरपरपाठे अयमाशो नैव समुच्छिन्नेन च वाक्यार्थपरिसमाप्तेर
न्येषाम परिग्रह एव स्यात् समुच्चयपरपरे ऽपेक्षितेपि तत्र पाठस्तु अन्येष्वपुपलक्षणादिविधया केच न पदार्थाः समुच्चेया
भवंतीति तत्र एव किल समुच्चायकं पदं पठनीयमिति तत्र पाठो ऽपि सनिपिनको ऽर्थो नारमवघोतयेदिति दिक्॥ प्रसंगं न वि
केतसो विनेयस्य मर्त्सलोकस्य स्थत्वात्तद्दृशोयमेनेह प्रयुक्तं॥ अथ विषयस्यास्य ग्रंथलक्षणस्याति सूक्ष्मत्वात्स हसा प्रकृत्वोपि
पथ्यं वदितव्यमिति न्यायात् द्वितीयपत्तनीयपल्ली संचितमात्रं ग्रंथच्छिती यन्नानीयपल्ली पाण्य हीनसंसारिकजीवस्य स्वरूपं
चुकिवेचयिंतु प्रतिजानीतेह नतद्दसारिना॥ हेतहर्षैः तुकं पायंवाक्या रंभविचारयोरिसनुशासनास्त्रविधाहाथ्येबाधा
तेहर्षेणास्यथावाप्रवक्ष्यामीतिवाक्यमारभ्यत इति वायोजनीयं॥ इदं सर्वेनुभवगोचरम परोक्षमखंडार्थस्वरूपं संसारिक
जीवस्वरूपमत्ता प्रकारं तेनुभ्यं प्रवक्ष्यामि प्रकर्षेणानिः संदेहं वक्ष्यामि कथयिष्यामि॥ इदं च सामान्यवाक्यं सामान्यात्मना

कं॰भा॰ शब्दबोधाय सामान्यात्मना कथनं चोत्तरवाक्यार्थद्वयस्यापि युगपत्प्रथमं संग्रहाय। तथा चेदं वाक्यार्थद्वयं वक्ष्यमाणं प्रकर्षे
७४ ण वक्ष्यामीत्यन्वयः। तत्र रेफपदार्थमखंडार्थस्यापि दीनमात्रोद्देशपत्रं सांसारिकरूपमपि चेति गुरुस्थमिति रघो हि गोतम हे नचि
केतः गुरुत्वं ग्रहाश्च नमया हि रूपामुपस्थितं गुरुत्वं जीवत्वं तियावत्। सनातनं अनादि ब्रह्मस्वरूपं यथा च भवति येन प्रकारेणापि २३
भवति तत्त्वतः शोधनादिप्रकारेण भवति। आत्मा जीवस्तु सांसारिकः यथा च मरणं प्राप्य येनापि प्रकारेण मरणं मृत्युप्रा
प्यलब्धा पुनः यथा च येनापि प्रकारेण भवति तेनापि प्रकारेण इदं वाक्यार्थद्वयं प्रवक्ष्यामि विशिष्य कथयिष्यामीति पूर्वेणान्वयः
अत्र चकारस्य पसदपर्यवसानाभ्यासेद्ध्याहियमाणतस्पदेपि समन्वेति तथा च तेनापि प्रकारेणेति प्रकारान्तरस्यापि सं
ग्रहो भवति अन्यथा ग्निरिसारिमनुष्यिवाक्यार्थद्वयेपि प्रकारान्तराणामुपसंग्रहः संगतो भवति। अत्राखंडार्थस्य प्राकृप्रव
त्तित्वेनोपस्थितत्वात्। प्रधानत्वाच्च प्रथमं तत्कथनप्रतिज्ञा निबद्धा संसारिकजीवस्य प्रागनुपस्थितत्वात् तत्पदार्थशोध
नागतत्वाच्च सांसारिककथनप्रतिज्ञा पश्चान्निबद्धा। अत्र प्रथमार्द्धेन मुख्यरूपस्य द्वितीयार्द्धेन सांसारिकरूपस्य च कथनं प्रतिज्ञा राम॰
तं भवति अत्र तेनु ष्यमितिवनेऽरसस्यतत्वेन तु द्वेष्यपक्षं तत्वेनापि योजनं संगतमेव पक्षद्वयेप्युद्देश्यपक्षत्वस्य गणार्थैकोन विरोधा ७४

नुद्दयात। अथ गुरुत्वमित्यादि पदानि त्रीणि एषु द्वितीयं तात्म्येव भवेत्तु तथा च ते इदं प्रवक्ष्यामि गुह्यं गुहास्थं जीवं सनातनं ब्रह्म
प्रवक्ष्यामि आत्मा यथा च मरणं प्राप्य भवति तथा वक्ष्यामीति क्रियानुषंगेण वाक्यत्र परीक्षान्वयः कुतो न क्रियते ते तुभ्यं
इदं गुह्यं जीवस्वरूपं सनातनं ब्रह्म प्रवक्ष्यामि हे गौतम आत्मा प्रमाता देहाभिमानी मरणं स्थूलदेहवियोगं प्राप्य यथा
च भवति तथा च प्रवक्ष्यामीति पूर्वार्द्धं सर्वमेकं वाक्यमुत्तरार्द्धं द्वितीयं वाक्यमिति वा कुतो न योज्यते वाक्यत्रैविध्याद्वाक्य
द्वैविध्यस्योचितत्वात् लाघवात् यथा चेत्पक्षद्वये वाक्योपकर्षेणान्वयगौरवादुत्कर्षविधयापकर्षं विनाप्यन्वयसंभ
वादिति चेत् न वाक्यद्वैविध्यापेक्षयापि वाक्यैकवाक्यस्यातिलघुत्वात् भवतामप्यनुषंगदोषसत्वेन तेन सहापकर्ष
दोषः सम एव। [illegible]मम प्रथमार्द्धं पदैकवाक्यं द्वितीयार्द्धमपि पदैकवाक्यमिति वाक्यद्वैविध्यं न च तु वाक्यार्थद्वयकर्मकं
वाक्यांतरं भवति तथा च पदैकवाक्यतया वाक्यैकवाक्यतापेक्षया लघुतरत्वात् कथं स्वपक्षे लाघवमिति चेत्। अथ गुरुत्व
मिति परं रहस्यार्थकं ब्रह्मविशेषणं भवतु किं जीवपरत्वकल्पनेनेति चेत् अयमेव स्तत्पदार्थमात्रपर एवास्त्विति चेत् स
त्सपरं तु सनातनमिति परस्यापि विशेषणत्वेन ब्रह्मपरात् पूर्वमेव निर्देशः स्यात् गुह्यपदवत् गुह्यपदं चाविशेष्यानंतरंनि

येतिवक्तव्येइन्नमयहायव. यनात्ताहास्यासो ऽपि देहे स्थितो भवति। अन्ये जीवा अनु नरकादिभोगादनुपश्चात् स्था ८

दिष्टस्थानं अतोगुह्यमिति परंब्रह्मातिरिक्तं परं ससारिशेषप्रमाणबलेनाप्युपपत्तियोगबलेनच जीवपरमिसेव निर्णीयते।
किंचोत्तरत्र तत्त्वेव शुक्रमित्यादिना ऽखंडार्थनिरूपणात् प्रतिज्ञातापीयमखंडार्थपरा समुचितैव। एवं गौतमेत्यस्या हे
पठनीयस्य सर्वान्ते पाठः नचिकेत सोऽन्यथप्रश्नस्तु हेऽप्यत्वेऽपि ग्रंथेनेनान संपादनीय ज्ञानोद्देश्यत्वं साधनचतुष्टय
संपन्नमस्तकलजनसाधारणं भवतिनतु नचिकेतोमात्रगतमिति सूचयितुमिति विभावनीयं। अथ सूचीकटा
हन्यायेन प्रतिज्ञाक्रमविरोधेऽपि प्रथमं सांसारिकजीवस्वरूपं संग्रहेण दर्शयति योनिमित्यादिना। अन्ये केचन देहि
नः शरीराभिमानिनः यथाकर्मकर्मानुष्ठितं शुभाशुभलक्षणमनतिक्रम्य यथाश्रुतं श्रुतं परोक्षज्ञानोपासना
प्राप्तज्ञानादिलक्षणमनतिक्रम्य योनिं देवमनुष्यनारकितिर्यगादिभोगयोग्यां योनिं प्रपद्यन्ते प्रकर्षेण प्राप्नुवं
पप्पा ति शरीरत्वाय शरीरसंपत्त्यर्थं अन्ये शरीरित्वाग्गुवक्षादिदेहं संयन्ति सम्यक् प्राप्नुवंतीत्यर्थः। अत्र यथाश्रुतमि
त्यस्य कर्मोक्तेः पश्चात्पाठः कर्म सर्वे जीवसाधारणं विनायत्नमपि भवेत् ततः कर्मव्यापकं श्रुतं तु कचिदेवजनेमहता
यत्नेन संपादनीयं च भवेदिति सूचनाय। अथ योनिमन्य इत्यत्र निरूपितं सांसारिकं जीवमुपादाय तदीयात्वंसंसरी

षितां दर्शयन् जीवेशसामानाधिकरण्यमस्यरूपमपोद्यारोपयति सार्धेनमनुना । एष सुषुप्तिसाक्षिन्ना । एष इतिपदं यो
निमन्य इति पूर्वमंत्रपरिगृहीतनिसापतेष्टं जीवं परामृशति एष पुरुषः निसापदेष्टः सुषुप्तिभावनासुरूपो जीवः इन्द्रिये
षु चक्षुरादिषु दर्शनादिविषयेषु सुषुप्तेषु सत्सु उपरतेषु सत्सु बुद्ध्युपाधिवशेन कामं पश्येच्छो कामं काम्यमानं वस्तु जानं
न्निमिमाणः सन् उत्पादयन् सन् आगच्छति जागरूको भवति । अत्र स्वप्नग्रहणं जाग्रदुपाधिपरिहाराय । अनेनान्येषु
पाधयः स्वप्नादिगताः बुद्ध्यादयः सुषुप्त्याधवलेवेन प्रबोधनीया इति सूचितं भवति । अत्र कामं यथा पश्येदिति कल्पने
न बाह्यसामग्र्यनपेक्षत्वस्य च नेन स्वप्नस्य केवलमानसत्वमेव प्रकाशितं भवति । अत्र सुषुप्तिस्वत्र विशिष्यश्री
२ षीभूतेंद्रियादेर्ग्रहणं अविद्यास्थूलदेहवासनादेरपि ग्रहणाय तथा च तदेव जीवस्वरूपमेव प्रसुकं प्रसुद्ध्वा धासा
मानाधिकरण्यपरीसालक्षणपावाकेवलविशेष्यांशमात्रेणाबोधितं तस्यार्थभूतप्रसुद्धस्वरूपमुच्यते तेन जीवस्व
रूपमेव ब्रह्मत्रिविधपरिच्छेदरहितभूमरूपमुच्यते । तदेव जीवस्वरूपमेवामृतं मुक्तिस्वरूपमुच्यते । अनेन स्वरूपल
क्षणद्वारा स्वरूपार्थो निरूपितो भवति । अथ तटस्थलक्षणद्वारापि बुद्धिवैशद्याय खंडार्थं दर्शयितुं तमिमं नितन

क०भा० ७६

स्मिन्जीवस्वरूपे शोधिते सर्वेपि लोकाः जडाजडवर्गलक्षणाः श्रिताः स्थिताः अनेन लोकाश्रितत्वमीशगतं जीवे कथि-
तमभेदमेव गमयितुं । आश्रितत्वमेव व्यतिरेकेण द्रढयति तदिति तत् शोधितजीवस्वरूपं लोकेषु निरूढेषु कश्चन को-
पि लोकः नात्येति नातिक्रम्य तिष्ठति एवं चेह जीवो ब्रह्मणो भेदविधानान्न स्वस्य परोक्षजीवपरत्वकल्पना पाव-
नी लोपन्यायानुसंधानापेक्षत्वेन स्पष्टं जीवेश सामानाधिकरण्यप्रभानादेन द्वैतमिति ब्रास्नणं मंत्रतात्पर्यं ज्ञा-
पनपरमिह संगानमेवा । अथैषमुप्रतिष्ठितिमनुसिद्धमखंडार्थमुपादाय तस्मिन्नेवाखंडार्थे पारमार्थिकम-
द्वितीयत्वापरपर्यायमभेदं व्यापकत्वं जीवत्वादिभेदाध्यारोपं च अभेदस्यैव पारमार्थिकत्वव्यवस्थापकं दर्शय-
ति अग्निर्वायुरित्यादिभ्यां मंत्राभ्यां । बहिश्चितेजस्त्वापरित्यागेनानभिव्यक्तप्रकाशादिरूपेण च प्रतिरूपग्रहणाद्विनि-
र्मुक्तः सन्नेव भूवा । अत्र ज्ञानेच्छाशक्त्यभिप्रायेणाग्निमनुः क्रियाशक्त्यभिप्रायेण वायुमनुरित्यपुनरुक्तिः । अथ भुवन-
प्रवेश सर्वभूतांतरात्मत्वयोः को भेद इति चेन्न भुवनप्रवेशसंबंधमात्रं सर्वभूतांतरात्मत्वे संबंधपूर्वकसकलवस्तुसत्ता-
प्रदत्वमिति भेदः । आसिद्धताघातकोऽसमासः परिगृहीतः अथोपमानेबहिष्टुनोपात्तमुपमेयेतुस्पष्टमेवोपात्तं तत्किं

एम० ७६

निबंधनमिति चेत्। अग्निर्वा घोरो बहिःस्थं सर्वं जनं सिद्धं आंतरत्वमेव केवलमप्रकटत्वात्स्मारणीयं उपमेये तु बहिःस्थि
तिरांतरस्थितिश्च प्रतिरूपात्मना लोकप्रसिद्धभावात्कथनीया भवति। अत्र प्रतिमानं प्रतिबिंबं प्रतिमा प्रतियातना प्रति
च्छाया॥ प्रतिकृतिरित्यादिवत्प्रतिरूपपदस्य प्रतिबिंबरूपार्थपरत्वेन प्रतिपदस्य समस्तत्वाद्रूपं रूपं प्रतिसमस्याच्चयाय प्रतीति
परम्परायामेव। अत्र प्रतीपस्यापेक्षितस्याप्यपाठस्तु अवच्छेदवादः प्रतिबिंबवादश्च वरे वेहास्तीति सूचनाय घटसं
वृतमाकाशं नीयमाने घटे यथा। घटो नीयेत नाकाशं तद्वज्जीवो नभोपमः॥ एकधा बहुधा चैव दृश्यते जलचंद्रवदितिप
क्षद्वयस्यापि श्रुतिपरिग्रहदर्शनात्। अथोपाधेरूपाधिकृतप्रतिरूपभावो रस्याध्यासिकत्वान्नेनात्मनो न गुणदोषारि
स्पृशंतीति सदृष्टांतमाह। सूर्य इत्यादिना। सूर्यः किरणद्वारा चक्षुर्दृष्टिनिरोधोपि भव किंच धूदृष्टिनिबात्योपि भवति। एवमयथा
त्मांतरोपि भवति। अनेनांतं संबध्नातीति तरो वा स्थोपि भवति। अनेन व्यापकत्वसूचनात्तु उपाधिपरिच्छेदेन हिंसा उपा
धिकृतदोषानस्पृशंतीति सूचितं भवति। अत्र चाक्षुषैरित्यादेः क्रियातः पूर्वं पठनीयस्य पश्चात्पाठः चक्षुषोग्रत्वेर
पि बाह्यैरांतरैश्च न संबध्नाति आंतरैर्दोषैरपि न संबध्नातीति द्योतनाय। अतएवोपमेयवाक्ये पि क्रियानंतरमेव दुःख

क॰भा॰
७७

परपाठः समादृतः लोकसुखादिनापि न लिप्यत इति ज्ञापनायनेन कामक्रोधाद्यस्पर्शीति बोधितं भवति। अथ यपस्य ब्रह्मचे
ति द्वितीयवल्यं तमनुप्रतिपादितमीशं विष्ट एव न द्वितीयतृतीयवल्यभिमतं जीवेशसामानाधिकरण्यं सफलं विशद
म यति एको वशी नित्यो नित्यानामिति द्वाभ्यां। वशी। वशो स्यास्तीति वशी स्वाधीनमायातत्कार्यशालित्वात् सर्वभूतां
तरात्मा सर्वेषां भूतानामन्तरात्मा अभिन्ननिमित्तोपादानतया सन्नात्मा हृदंतर्यामी च एकं रूपं स्वस्वरूपं मायोपाधितो वि
वर्तरूपतया बहुधा विविधप्रपंचात्मना यः ईशः करोति उत्पादयति। अत्रैकमिति स्वग्रहणामप्येव बहुरूपताग्रहणो वि
रोधस्फूर्तैः। विरोधपरिहारस्तु विवर्तवादेन विज्ञेयः। अनेनैकमिति पदग्रहणस्य फलं विवर्तवादसूचनमिति सिद्धं। त
मीशं ये धीराः जनाः आत्मस्थं आत्मनि देहादिगुहायामविघातावतिष्ठतीति आत्मस्थं जीवं जीवाभिन्नत्वं कृ
शोधनेन अनुपश्यन्ति शोधनानन्तरं साक्षात्कुर्वन्ति तेषां शाश्वतं नित्यं निरतिशयं मोक्षाख्यं सुखं भवति इतरेषां
भेददर्शिनां न भवतीति योजना। अन्वयः एकोपि वशी सन् सर्वभूतान्तरात्मा भवति यः एकमपि रूपं स्वस्वरूपं स्वाधि राम॰
ष्ठानचैतन्यं बहुधा करोतीति यः नित्यानामपि नित्यः चेतनानामपि चेतनः बहूनामप्येक एव भवति यः कामान्विदधा ७७

नीतिवाक्यभेदप्रकारः अत्र योगपतत्पाचक्रेऽपि काराद्व्याख्याहारेणाहरणीयाः तेषामपेक्षितानामपीहापाठः अय
माणविशेषणासजातीयविशेषणानामन्येषामपि बहूनामुपसंग्रहोऽत्र भूयादिति । अनुपश्यंपत्ति अनुसरणक्रो हीने
पश्यंपत्ति अनुपश्यद्वा द्वाभ्रवणादेः पश्यंतीत्यर्थः अत्रानुवोधेनुसरणहेतुः संसारत्यागपूर्वकत्वेन तत्रापि श्रेयस्य हेतुत्वा द्वि
णा इति पदं क्रियापातः पूर्वमेव पठितुमुचितमपि श्रवणपूर्वकमेतत्थैर्यमुत्तरोत्तरं दृढतरं भवतीति सूचनाय मनुद्वये
ऽपि पश्चात्पठितं । अथैकोवषीत्यादिमनुद्वयमपि नाखंडार्थपरं भवतु किंतु केवलेशपरमपरमपस्यैव सूचेतिमत्र विवरणं
हेस इतिमत्रव इवतु । आत्मस्थमिति पदमपि जीवपरं माभूत किंतु जीवांतर्यामिपरं भवतु श्वाधानोरधिकस्यैवंसति फल
पुष्टिसिद्धेः ईदृशो ध्यातानस्यमहाखंडार्थज्ञानद्वारा मुक्तिहेतुत्वात्सुखशांत्यादिफलसंबंधो विघटत एवेतिनको विवि
रोध इति चेन्नसत्यं परं तु तृतीयमंत्रे तत्रेतिमन्यत इति एको वशी त्यादिमनुद्वयस्याखंडार्थपरत्वेन विवरणं दृप्पमानं
भवन्मतेनैव संगतं भवेत् । अत्र कामान्विहायेति विरूध्येकामपदस्य पश्चात्पाठः कर्मानुरूपेण दुःखाद्यपि विहायेति
त्यं प्राप्यापिपरिग्रहाय । अथैको वशी त्यादिमंत्रद्वयेपि तत्पराणार्थे देशोन त्वपराणंभावो विहितस्तद्द्वारस्सुधीराद्युपाना स्तत्र

क०भा०
७८

तन्मेव ह्रदपसिद्धं सामान्याधिकरण्येन चिकेतास्तथैवानुवदन् अखंडार्थे गतं स्वरूपविशेषं संदेहेन हेतुना पृच्छति तदेतदिति।तदि
शास्वरूपं एतज्जीवस्वरूपं भवतीति अखंडार्थात्मनामन्यंते अखंडार्थ एव परमपुरुषार्थ इति जानंतीत्यर्थः।तदिति नु वितर्के
तत्परमं सुखं कथं केन प्रकारेणाकेन स्वरूपेणाहं विजानीयां विशेषेणाजानीयां परमसुखप्रकारीभूतं स्वरूपं किं वा भवतिय
न प्रकाररूपेणास्वरूपेणाजानीयां स्वप्रकाशत्वेन तज्ज्ञेयं वोतास्वप्रकाशत्वेनेति भावः।तदेव वैकल्पिकं कोटिद्वयं स्फुटय
ति किं चित्सादिनातत्सुखं किमु भाति स्वप्रकाशं वा न भाति वास्वप्रकाशं न भवति वेत्यर्थः।अथ तदेतदिति नचिकेतसा प्रश्ने
प्रवृत्ते सति यम उत्तरयति न तत्रेति तत्र तस्मिन् विषये अखंडार्थे लक्षणे विषये न था च तस्य रस्योजउत्वा इखंडार्थविष
येन समर्थो प्रकाशनायेति भावः।अत्र सूर्यचन्द्राकस्य विद्युद्दा केचभालिक्रिया पठिता चंद्राग्निवाकस्पोस्तनुषंगेण भाति
क्रियान्वयोभिमतः।एवं च क्वचित् क्रियापाठः क्वचिदनुषंग इति वैरूप्यं दिव्यं तेजः सूर्यस्य महत्त्वादादृश्यते जः सुविद्युतो
महत्वात्तद्वाके क्रियानिर्देशोऽन्यत्रानुषंगस्त्वात्र एषा संतावत्त्वस्य सूचनाय।अत्रेमा अपि मितिनिर्देशान्तसमीपवर्त्तिमे राम०
घलोकोपरिस्थितं तेज एवं च विद्युत्संदेनाग्निपदेन भौममेव तेजः सर्वलोकोपकारकं परिगृह्यते तत्पार्श्वस्य चंद्राराविदंप ७८

द्वाभ्यां योगाद्रूढेर्वान्नित्वं विप्रकृष्टार्थप्रयोगात् समीपवर्त्तित्वं लक्ष्यत इति वेदितव्यं॥ तत्परस्मैपदबहुवचनानि पठितानि सूत्रे योर्हि
नामेवोपस्थितत्वात् परामर्शकानिरस्तुस्तथा माभूत् तत्केनुप्रपंच सामान्यस्येह परामर्शो भवत्विति। तत्रैवं सति सर्वे परस्मैपदे नपुंसकं वाको
त तेपाठतम्मितिविवृष्टिनार्थः सिद्धो भवति। मवेसेवकारेणान्यानुसरणं व्यावर्त्यते अन्यच्च शंकितं परार्थोत्तरं वेदितव्यं। अत्रतमे
वभांतमनुभातीत्युक्तं तत्र भानानुस्मरणं भानस्य भानोत्तरभावित्वमात्रेणाविष्यात् एवं च परार्थानां भानं स्वाभाविकमेवास्ये
ऽभानोत्तरं भवतीति भ्रमः स्यात् तन्माभूत्। अस्त्वेवं भानाधीनमेव परार्थानां भानमिति स्पष्टीकर्तुं तमेव भांतमनुभाति सर्वं वि
ति चरणविवरणायतस्य भासेति तुरीयचरणं प्रवर्तितमिति विवेक्तव्यं। अथ महत्स्वरूत्वोपि पथ्यवदितव्यमिति न्यायेन
महावाक्यार्थसामानाधिकरण्यद्वारा प्रकाशयितुं षष्ठवल्याद्येन सार्द्धेन मनुनानुसंधत्ते ऊर्ध्वमूल इत्यादिना अत्रोर्ध्वमूल इत्यर्थ
मन्त्रमपारि पंचकोशावच्छिन्नजीवपरं पूर्वमेषसुप्तेषु जागर्त्तीति पूर्वोक्तस्य स्वभावस्याप्रतिपादनपूर्वकं जीवपरत्वान्नज्ञी
वोद्देशेन तदेव शुक्रमिति मनुना शोधितेन ब्रह्मविधानेनोर्ध्वमूलमंत्रेपि तदेव शुक्रमित्यादिमनोरविरुद्धतत्प्रेतपाठतः प्रत्य
भिन्नानां तथैव जीवोद्देशेन ब्रह्मविधानौचित्यात्। ऊर्ध्वमूल इत्यादेर्जीवपरत्वमेव य एष सुप्तेष्विति मंत्रवत् एव जीवः अन्नमया

क॰भा॰ ७९ दिकोशावच्छिन्नः ऊर्ध्वमूलः ऊर्ध्वं मूलं मूलमिव स्थितं शिरोलक्षणं यस्य संघाताभिमानिनः पुरुष ऊर्ध्वं सर्वतत्वेभ्योप्युपरि विद्यादिभ्योत्रे
मूलं भूमरूपमधिष्ठानं भूतचैतन्यं यस्य संघातरूपजीवस्य सतथा। अधःशाखः हस्तपादादिलक्षणाः शाखावान् यद्वा भूमा
धिष्ठानतो निर्गता धोभ्रः महत्तत्वसाहंकारादिपृथिव्यंतशाखावान् अश्वत्थः श्वोपि ज्ञाने सति न तिष्ठतीत्यश्वत्थः सनातनः विना
ज्ञानमनुच्छेद्यत्वात् अनादिकालमारभ्य प्रवृत्तत्वाच्च चिरंतनो भवतीति तदेव एतदेव जीवस्वरूपं अत्रैकारलोपश्छांदसः शुक्रं शु
द्धं तद्ब्रह्म सर्वस्मादपि महद्रूपं तदेवामृतं निष्प्रपंचस्वरूपमुच्यते एवं चेह बाधायां सामानाधिकरण्यमिति रीत्याखंडार्थः
परिगृहीतो भवति। तस्मिंश्चैव शोधितत्वंपदार्थे एव लोकाः सर्वेपि श्रिताः स्थिताः ततः शोधितत्वंपदार्थस्वरूपं भूमरूपं क
श्चनकोपि लोकः नात्येति नातिक्रामति भूम्नः सर्वाधिष्ठानत्वात्। अथवा तदेव शुक्रमित्यादि विशेषणत्रयं स्वरूपलक्षणाभि
प्रायकं तेनानंदादयः प्रधानस्येति स्वरूपलक्षणानुगुणा गुणाः उपसंहरणीयाः तस्मिन् लोकाः इति वाक्यं तटस्थलक्ष
णतात्पर्यकं तेन यतो वा इमानि भूतानी त्याद्युपात्तगुणा ग्राह्या इति संग्रहार्थः। अथवा तदेव शुक्रं ब्रह्मामृतं चोच्यत इति लिंगभूतैः राम॰ ७९
केशाकाशिरश्चैने संभवति वाक्यत्रयपर्यवसानं च नेयं हृभूततत्त्वप्रदाह जिह्वा राजीवस्वरूपेषु क ब्रह्मामृतनामभेदानैव केनापि प्रमाणेन विरुद्धो

नाप्यत्र कश्चिद्दोषः। कार्यविद्येयेति संशयासंभावनाविपरीतभावनारूपो नकार्योऽस्य स्वरूपे रूपं विषयं दृढीकरोति। अत एव तत्त्वदेव
मुक्तादिस्वरूपं भवती स्वनुत्वकोऽयन इति कथं नान्तमहीयानुभवेनैवाहं वद्रामिकदाचिदेकस्य पुरुषस्य भ्रमरूपानुभवस्यापि संभा
वितत्वे न विषयसाधकतायास्तस्याप्युपगंतुमशक्यत्वाद्यथेनमयोच्यमानोऽप्युपमरुडगर्थो लीक एव भ्रममूलकत्वादिति
नाशंकनीयं परेषामपि बहूनां तत्त्वज्ञानामेवमेवानुभवदर्शनाद्यथानुभवं तेऽप्यमनत्वादेकस्य कदाचिद्भ्रमसंभवेऽपि
बहूनां तत्कल्पनेमानाभावान्नैत्तिरीयोपनिषदि जीवन्मुक्तानुभवस्याहमन्नमित्यादिना सुवर्णज्योतिरित्यंतेन प्र
दर्शनात् पुरुषाणां कथंचिद्भ्रमसंभवेऽपि वेदपुरुषस्य भ्रमप्रमादादिदोषसामान्यस्याप्यभावेन तेन वेदपुरुषेणेशा
वास्यादिश्रुतिषु स्वकीयोपि यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः तत्र को मोहः कः शोक एकत्वमनुपश्यत इत्यादि
वचनैरखंडार्थस्य स्पष्टमेव निरूप्यमानत्वादिति स्वचितं भवति। तथा च तदेव मुक्तादिरूपं उच्यते जीवन्मुक्तैरनुभवपरैर्नि
र्दोषेण वेदपुरुषेणाप्यसमर्थः। अयमत्र दैवेशादिषु वाक्येषु प्रथमद्वितीयवाक्ययोरेवकार उपलभ्यते न मध्यमेवाक्ये एवं चै
वकारपाठाद्रूपस्यासंकं कथं परिहरणीयमिति चेत् आशंकितवस्तुनर्व्यावर्त्तनाय पक्षैर्लैवकारस्सुक्तं तत्र विधयपरिछे

क॰भा॰ ८० दभूम्नस्त्वलक्षणब्रह्मत्वेविधीयमानेनिरुक्ताशंकाप्रमुक्तत्वामृतत्वयोरिवनोदेसेव। ब्रह्मपदेनवस्तुसामान्यकृतपरिच्छेदाभावबो
धनाज्जीवादतिरिक्तं ब्रह्मभवतुनजीवइतिवक्तुमशक्यत्वात्‌ब्रह्मपदेनसर्वात्मत्वद्योतनेनजीवकृतपरिच्छेदराहित्यस्यापि
ज्ञापनेनजीवेऽश्माभेदसिद्धेः एवंचब्रह्मत्वाकांतावदेवकारापाठःसमुचितएव। स्थिताइतिप्रयोगेचेतस्याधिकरणप्राक्प्रधा स्थितं: सकर्मकत्वात्‌क्रिया॥
नत्वेनाधिकरणत्वलक्षणंकारकत्वंभूतत्वेघटइत्यादाविवाधारसमसत्ताकमेवप्रसज्येततन्माभूदितिश्रियंवाविवक्षितक
र्मोपरिगृहीतः एवंचतस्मिन्नितिसप्तम्याधिकरणत्वमवास्तवमौपाधिकमेवप्रतिपाद्यमितिवेदितव्यं। अथनजायतेप्रिय
तेवापिपश्चिरित्यानामयंब्रह्मचक्षत्रंचेत्यादिनास्वाचितेनत्वेपरार्थसामान्याधिकरण्यंविस्पष्टीकरोतियदिदमि। अथयपरि
दंकिंचेतिमंत्रेउद्घतवज्रवन्नामकत्वादुद्घतवज्रत्वेननिरंकुशंभयहेतुत्वादुपत्वेनचपरमात्मरूपंनिरूपितंसंप्रतितदेवभय
हेतुत्वंद्वितीयवल्यांयस्यब्रह्मवेतिमंत्रंतमनुनापरिगृहीतमवधुसाविशदयतिभयादितियस्यब्रह्मचक्षत्रंचेतिद्वितीयवल्यंतम
नोब्रह्मक्षत्रपदेप्रपंचोपलक्षणपरेइतिप्रागभिहितंतदेवेहेंद्रादीनामग्रहणेनप्रकटीकृतंभवति। अथद्वितीयवल्यांतेपठि ए॰ ८०
तंयस्यब्रह्मवेतिमंत्रंतुयदिदंकिंचेभयादस्येतिमंत्रंतुप्वांविदित्क्रमप्राप्तंतृतीयवल्यादौपठितेरुतमितिमंत्रेविहायनिरहेतिशरीर

स्वदेहसंबंधस्सः वितंत्रमना सर्वमेव हि मनुष्यलोके बोद्धुं साक्षात्कर्तुं प्रकरणसामर्थ्याद् इष्टं फलादिमत्त्वसिद्धमखंडार्थमिति कर्मप
रेष्वरणीयं अशकत् अणकुर्वन्नप्युत तर्हि ततः साक्षात्काराभावात् एहेतोः मानुषदेहावसानसमय एव विदेहकैवल्यप्रसक्ते
र्यथाकर्मोपासनपरोक्षज्ञानं स्वर्गेषु सृज्यंते फलानि येषु तेषु लोकेषु शरीरत्याय देहपरिग्रहापकल्पनेन समर्थो भवति।
अनेन मानुषदेहसमय एवात्मसाक्षात्कारो जननीय इति सिद्धं भवति। अथैनमेव मंत्रं तत्तीयोपयुक्तं गेहवार्थेत्याद्याचष्टे
र्यथेत्यादिना आदर्शे रूपं यथा मुखादि निम्नलंबकुंचकालमेकरूपं भाति तथात्मनि मानुषेऽस्मिन् देहे अखंडार्थः सुस्पु
ष्ठं प्रकाशेत। यथा स्वप्ने पथगजारयश्चंचलाः क्षणमात्रभानास्तथा ध्रुवं पितृलोके मनसो विषये स्युश्चंचलास्तथात्म
लीनतयाखंडार्थोऽभासेन। यथाप्सु चंचलासु मुखादिरपरिस्पष्ट इव क्षणिकभानमिव भवति। तथा गंधर्वलोके बहुविषय
व्यासंगात् स्वल्पमेवाखंडार्थभानं भवति। अथ यस्तु नब्रह्मलोके छायातपघट इवाखंडार्थोऽभासेन विभाति ऊर्ध्वब्रह्मलोके आ
तपघट इवात्मा स्पष्टतरं भासते तत्सर्वथा अनेन नरलोके सत्वरं साक्षात्कारेण शीघ्रमेव मुक्तिर्भवति। तमपहायात्मानं रथिन
मित्यादेर्लक्षितश्लोकः प्रकरणपरिमितं तस्य प्रकरणस्यार्थं तत्तोपवल्लीगतरूपकोपमादेर्विवक्षितार्था बुद्धिर्भूतत्वान्न रथादिहारेण

क०भा०
८१

संग्रहेण विवृणोति। इंद्रियाणामिति। पृथगुत्पद्यमानानां पृथक् आत्मनः सकाशात् पृथग्भेदेन पराकूल्येन उत्पद्यमानानां उत ऊर्ध्व
विवृत्याभिमुख्येन पद्यमानानां प्रादुर्भवतां विषयमेव गृहीतुं गच्छतां तत्तत्समुत्पन्नवतामिंद्रियाणां ज्ञानकर्मलक्षणानां भावं स
वं धर्मं स्थितिं उदयास्तमयौ च उत्पत्तिविनाशौ च पृथक् परिहृत्य पृथग्विनांतरेणात्मैर्निरूढ.नानाचवर्जनेन इति स्मरणात् पृथ
क्परंभेदार्थकमपि हापेसर्थकमपि भवति। तथा चेंद्रियविषयवर्गेषु संश्लिष्टेतिपर्यवस्यति। तथा चेंद्रियाणि स्वरूपं संशो
ध्यतन्त्विस्थोः परमपदे न क्षेत्रं स्वरूपं मत्वानि णोपधीरः न शोचति तरति शोकमात्मविदिति श्रुतेरिति मनुवर्त्तुलार्थः
अनेनात्मा प्रबुद्धः इंद्रियैरनो योगेनैव भोक्तृत्वादयः इत्यादि तात्मानं रथिनमित्यादिश्रुतेः करणानां स्वार्थप्रकाशिनो भवति।
यदिति पाठे इण् धातोः शतृरिय्यापकं बस्लेसर्थः। संप्रति क्रमप्राप्तमिंद्रियेभ्यः परा ह्यर्था इति मंत्रद्वयतात्पर्यं प्रकाशयितुमिं
द्रियादीनां पुरुषांतानां स्थूलसूक्ष्मभावमुत्तरोत्तरमांतरत्वं परत्वं पुरुषस्य शोधितत्वं परार्थलक्षणमप्यवशेषितत्वं च दर्शो
यति इंद्रियेभ्यः परमित्यादिभ्यां मंत्राभ्यां। अत्रेंद्रियेभ्यः परत्वेन इंद्रियानंतरमर्थग्रहणं विना मनस एव परिग्रहात् इंद्रिया
णि हयानाहुर्विषयांस्तेषु गोचरानिति समुपात्ते पश्चांतरं परसमनमिहानुगृहीतं भवति तेनार्थेभ्यः पराणींद्रियाणीति

पाप०
८१

प्रथमं द्वितीयं भवति। मुच्यते संसारान्महाखेदार्थ्येसा साक्षात्कारेणाविद्यानिवर्तनेनान्मुक्तो भवति। जीवन्मुक्तावस्थानेन प्रति
पादिता भवति। अमृतत्वं जीवन्मुक्तानंतरं विदेहकैवल्यं च गच्छति प्राप्नोति। यद्वा सर्वदुःखनिवृत्तिः पश्चात्सानंदावाप्तिरिति मे
रः समुन्नेयः। अथेंद्रियेभ्यः परा ह्यर्था इति तीवल्लीमनुद्रवसेंद्रियेभ्यः परं मनइत्यादिमंत्राभ्यां विवृतत्वात् क्रमप्राप्त
मेवसर्वदिष्टितिमवं ज्ञानेषाऽय विशेषमुपायांतरनिराकरणाय पूर्वोक्तंदर्शयन् विवृणोति। न संदृशइत्यादिना मंत्रेण। अस्या
त्मनो रूपस्वरूपं संदृशे प्रकाशनेविषये न तिष्ठति कर्मरूपतयानवर्तेत एवत्र अविद्यावृतत्वेन ज्ञानात्मनिसंदिहानं दृशप्रका
शनाभावात्। तथा चक्षुषात्मान प्रकाशते इति कथितं भवति। अत्र चक्षुःपदं करणांतराणामुपलक्षणार्थं तथा च कश्च
नकोपि जनः एनं चक्षुषा तोयपरोक्षमप्यात्मानं चक्षुषा चक्षुरादिकरणग्रामेण रूपादिरहितत्वान्न पश्यति चक्षुरादीनां रू
पादिमद्विषयेष्वेव प्रवृत्तेः। अनेनानुमानादिप्रमाणानामप्युपलक्षणाविषयानवतारः सूचितो भवति तेषामपि व्या
प्तिग्रहसादृश्यपरिज्ञानशक्तिग्रहादिमूलकत्वात् तेषामपि रूपादिगुणवत्स्वेव प्रवृत्तत्वान्निर्गुणेत्मन्यप्रयोगात्। तथा चे
षसर्वेषु भूतेषु गूढोत्मा न प्रकाशत इति पूर्वार्द्धेन संदृशे इति पूर्वार्द्धेन विवृतं भवति। हृदेति अत्र पदपतीत्युपज्यते। हृ

क०भा०
८२

हाबुध्या मनीषा मनीसपाऽहंकारेण मनसा मानसेन त्रिविधेनांप्यंतःकरणेन संख्यादितत्र प्रसिद्धेन अभिज्ञः समर्थो
जनस्तु शुद्धांतःकरणो जनस्तु एनं निस्पापरो क्षमात्मानं प्रपश्यतीत्यन्वयः। हृदेसारिपाहेन दृश्यते त्वग्र्यया बुध्या सूक्ष्मया
सूक्ष्मदर्शिभिः सुक्ष्मेणाड्डौ विहितो वेदितव्यः एष सर्वेष्विति मनो फलानि रेशान्नसंदर्शाइ स्तेनं मंत्रस्य तद्विवरणरूपत्वा
त्तन्मंत्रोपेक्षितं फलाभं प्रूरयति। अथ नसंदर्पाइतिमंत्रे हृदाघाभिज्ञप्रत्वेनाम्नतत्वमुक्तं। तत्र हृदाघाभिज्ञप्रताकरास्पा
दित्याकांक्षायां तामाकांक्षां प्रूरयन् रूपं ते पिबेत्ना विनिन्नीयवल्ली विवरणरूपत्वादिहचैदित्सादिषष्ठवल्याःक्रमप्राप्तप
ष्ठेद्वाइं मनसीसंतिमंत्रं त्रयं पंचसादिभिः षष्ठिमें त्रैव्याकरिष्यन्। तत्र प्रथमे पद्यातामिति मंत्रात्मांपच्छेदिति
तीयवल्ल्येतमंत्रे संप्रज्ञातेः संप्रज्ञातलक्षणोभयविधसमाधिपरत्वेन योगपरतया विस्पष्टयत्रियदेति। आसंमं
त्रांत्सर्वतोपि विषयतः पंचकर्मेंद्रियाणि पंचज्ञानेंद्रियाणि च मनसा सहावतिष्ठंते परितिक्रियाविशेषणाय घयाभव
तितथावतिष्ठते निश्चेष्टा। निभवंतीति परितिपावत्। बुद्धिश्च पषयामवतिनयानविचेष्टतिनचलतिन विचेष्टतीति
यदितियावत् अवतिष्ठते इतियत्न विचेष्टतीति यत् तोऽवस्थानलक्षणचेष्टाभावरूपां परमांसमुत्कृष्टांगतिमा ८२

सा रुं वृद्धाइस्तत्व ॥ अत्र पदेतिमात्मरूपेण निर्दिष्टस्यात्मामिति निर्दिष्टं प्रोक्तमितिमिति विधेयापेक्षया द्वैसंहितपत्तासप्रकृतिजे
लस्येतिवृत्तं । अत एवान्यत्र मनाश्रम्भूवं नारदों नाम्ना षभिस्यादिश्रुतिप्रामाण्यात् । इंद्रिये मेन स्वेव विषयसमर्पणा
च्चार्थ्येतो मनसः प्राधान्येपि इंद्रियाणां प्रकारां न रेण प्राधान्य सूचनाय मनसा सहेति । एवं च मनसः प्राधान्येपि इंद्रिया
णामप्राधान्येपि इंद्रियाणाम निग्रहे तत्वेनास्येव समयमवलंब्य विषयाकारं मनन्ति समर्प्य संसारयेयुरिति प्राधान्य
विवक्षया वनितिष्ठतं इति शिरिः ॥ अत्राहुरितिकथनात्सर्वे प्रमाणसंमतिः सूचिता । अथ द्वितीयेन मनुना नामिसादिना
निरुक्तबुद्ध्यादिस्थितस्वेव गुणविशेषं दर्शयति इंद्रियधारणामिति । अत्रेंद्रियपदं इंद्रियमनोबुद्धिपरं । पूर्वमंत्रेन थेवनि
र्दिशात्तेनां अविवेकादिलक्षणरूपां स्थितिं अभ्यांसपरिपाके नाचंचलां इंद्रियधारणां इंद्रियमनोबुद्धीनामखंडे पर
मात्मनिधारणां नरात्मनास्थितिं योगं जीवेष्यासं जीवेषो काकरत्वार दविघाराहे न मन्यंते जानेति नयाचाखंडथ्याका
रावस्थितिमेव बुधोस्ती गमखंड घ्योन्मकं न त्वायकलाज्ञानं नतीत्याप्यायः ॥ अथतो योगमितिमन्यंते इत्येताव तैवाभिम
तार्थे सिद्धेः स्थिरां इंद्रियधारणामिति पदद्वयमप्यनर्थकं किंचनामिस्यने नेंद्रियधारणायाएवकृप्तं वैमनूपात्तायाः परि

क०भा०
८३

ग्रहणस्युनरपिग्रहण।पुनरुत्थाधायकमितिचेन्नसत्संपरंतुस्थिरामित्युक्तत्वग्रहणात्पूर्वमस्थिरापियोगादिसंज्ञाल
भतेइतिसूचितंभवतितेन।अस्थिरत्वेनोच्यमानावस्थासंप्रज्ञातसमाधिरिति।अत्रयोगःदृष्टिप्रभवाप्ययोभव
तीत्यन्वयः।अत्रकार्यकारणयोरभेदोपचारात्इहकथ्यतेयोगाद्दृष्टिप्रभवाप्ययौभवतस्तत्रयोगएवादृष्टिप्रभवाप्य
योभवतीसतिप्राद्संपत्तयेनिरुक्तेएकोद्रष्टःपंचनैकाभवतीतिवदु।तथाचतत्तीयवक्ष्येविवृतिरूपत्वात्तत्पद
वल्याग्रात्यमस्तित्वपक्षमुनराहैनतरसैयमपूर्वोक्तेनपरिस्साज्यंनास्तित्वपक्षमौपाधिकंमनस्तिनिधापोपा
धिंविघारयति।नैवेति।अत्रप्रकरणानुरोधात्कूपदेकमेवदृश्यसामान्यपरंचक्षुःपदंज्ञानेंद्रियसामान्यपरंमनःप
दंचसाहंकारमनःपरमितिविवेक्तव्यं।अत्रवाक्चक्षुर्मनसांप्राधान्यात्परिगृहीतानामन्योपलक्षकत्वमहंवि
द्धंभवति।तथाचचक्षुरादीनामखंडार्थेपुरुषस्वरूपेप्रवृत्त्यभावात्पुरुषविषयकज्ञानमेवदूरापास्तमितिपुरुषोना
स्तीतिव्यवहारःकेवलमौपाधिकएववस्तुनः।खंडार्थेलक्षणापुरुषस्यबुद्धिगम्यत्वव्यवस्थापनादस्तित्वपक्ष राद०
एवास्थिरीभूतइत्यभिप्रायः।अथनैववाचेत्यादिनाप्यनास्तित्वपक्षउपाधिकोनस्वाभाविकइतिसाधितंसंप्रतिना ८३

तत्वंपर्यायार्थे न तु तस्य भावस्तत्वमिति तत्व५ [illegible] भावपरं किंतु पर्यायार्थे ह॰ तत्वस्य भावो पर्यायार्थ्यमिति ९

वदस्तिपक्षे स्वाभाविकत्वेन साधयति अस्तीति। अस्तीति ब्रुवतः कथयतः पक्षादन्यत्र नास्तीति पक्षेन नास्ति
त्वं कथमुपलभ्यते केन प्रकारेण ज्ञायते। अथ सत्तामंतरेण नास्तिपक्षसाधनमेव न संभवति सत्तायां च सिद्धायां सत्तामु
प एव पुरुषो ऽखंडार्थरूपः सिद्ध इति पक्षं समयुक्तिकमुपसंहरति अस्तीति। यस्मान्नास्तित्वमेव पुरुषमंतरेण न सि
ध्यति तस्मात्स पुरुषोऽस्तीत्येवोपलब्धव्यः उभयोः पक्षयोः अस्तित्वपक्षे नास्तित्वपक्षे च अस्तित्वपक्षे पुरुषः
साक्षादेव सिध्यति नास्तित्वपक्षे नास्तित्वसत्तामंतरत्वेन पुरुषः सिध्यतीति। उभयोरपि पक्षयोः पुरुषः अस्तीति
सत्ताप्रकारेणैवोपलब्धव्यः ज्ञातव्यः। अथ अस्तिपदं भावप्रधानं अस्तित्वपरं इति पदमनुकरणपदं अस्तित्वमित्ये
न लक्षणप्रकारेणैव एवकारः पक्षांतरं नास्तित्वलक्षणमस्यौपाधिकं व्यावर्तयति। अत्र उभयोः पक्षयो
रस्तीत्येवोपलब्धव्य इत्यवांतरवाक्यपरिसमाप्तेस्तत्वभावेन चेत्यवांतरवाक्यारंभः चकारो यमिति कारबोधितप्र
कारसमुच्चयपरः अस्तित्वप्रकारेणोपयोगाद्व्यस्तत्वभावेन च बोद्धव्य इत्यर्थः। अत्रैपावतः न चानवकल्पना सि
द्धसत्तया अस्तित्वाद्व्यवहारनिर्वाहः इति वक्तुं शक्यं कल्पनाया निरधिष्ठानत्वायोगादधिष्ठानस्यापि काल्पनिक

क०भा०
८४

लेतस्याप्यधिष्ठानांतरं कारणिकं तस्याप्येवमित्यनवस्थापत्तेः। अस्तित्वषष्ठभावेन याथार्थ्यं पुरुषस्य सिध्यतीत्येनमर्थं यमः
स्वयमेव विवृणोति अस्तीति अस्तीत्येवोपलब्धव्य एवकारः पूर्ववन्नास्तित्वनिराकरणपरः पूर्वमेवकारेणाव्यावर्त्तितस्य
पुनरपि कथनं सर्वथा पुरुषे नास्तित्वं नापाकरणीयमिति द्योतनाय। अस्तित्वरूपेणानास्तित्वव्याहतिपूर्वकमुपलब्धस्य प्र
माणतो निर्णीतस्य पुरुषस्य तत्त्वभावो याथार्थ्यं प्रसीदतीति सत्त्वात्षष्ठभावेनानवस्थादोषापरिहाराय याथार्थ्यं पु
रुषस्य सिध्यत्येवेति भावः। अत्र प्रसीदतीति प्रयोगाद्याथार्थ्यमतिनिर्मलं प्रमाणसिद्धं वादिभिर्निराकर्त्तुमशक्यमि
ति सूचितं भवति। अथ पूर्वं तृतीयवल्ल्यां पञ्चदशे ह्याद्-मनसी स्यादिना योगानुष्ठानप्रकार उक्तः षष्ठवल्ल्यामपि यदा पंचावति
ष्ठन्त इत्यादिना महता प्रबंधेन तृतीयवल्ली विवरणपरेण योगानुष्ठानं समाम्नातं तत्र योगानुष्ठानमिदं किंपर्यन्तं कर्त्त
व्यं भवतीति प्रश्ने तस्य फलसिद्धी साहयरेति द्वाभ्यां मन्त्राभ्यां अथ येदमनुपपन्नं तृतीयवल्ल्यां यच्छेदिति मनुर्नेयोगपराः किं
वृत्तानसाधनीभूतेंद्रियादिनियमनपरः एवं षष्ठवल्ल्यामप्युपसंपदा पंचेत्यादिमनवोपि ज्ञानसाधनीभूतेंद्रियनिग्रहा
दिपराः तां योगमिति योगो हि प्रभवाप्ययाविति योगपदे च न प्रसिद्धयोगपरे किंत्वखंडार्थपरे एवं योगः अहि प्रभवेति न प

रा०
८४

रुच्छेदः किंतु हीति परिच्छेदः तत्त्वाच्च योगः अखंडार्थः प्रभवाप्ययौ प्रपंचोत्पत्तिलयस्थानं भवतीत्यर्थः इतिनास्यामुपनिषदि प्र
सिद्धयोगप्रसंग इतिचेत् सत्यं परं त्वत्र रूपमिह योगप्रकरणायच्छेदपदद्वा पंचेति द्वयमपि भवती सम्पुपेयं ग्रंथसमाप्तौ द्विती
यगुरूणामृत्युप्रोक्तां नचिकेताः थलब्ध्वा विद्यामेतां योगविधिं च कृत्स्नमित्यनेन ब्रह्मविद्यावत्कृत्स्नयोगविधेरपीहग्रंथे
प्रस्तुतत्वेनाविस्पष्टं निर्देशात् अत्रैव च्छेदरिति पदद्वा पंचेत्सा ह्यच योगपरमेवावस्थापाभ्युपेयमिति दिक्। तत्रादौ वासनाना
शोजीवन्मुक्तिविदेहमुक्त्योः साधनमित्याह परेति। अत्र पदद्वयवाक्यस्य पश्चात्पाठात् पूर्ववाक्येन इतिपदं आर्थिकं। कामा
इति विशेष्यस्याक्रियातः पूर्वं सर्वेऽस्यनंतरं निर्दिष्टस्यस्य सर्वानिति निर्देशः क्रियापां कामातिरिक्तानामपि केषांचिदन्वयाय
क्रोधलोभमोहकर्मबुद्धिगतवासनातिरिक्तधर्माः संभाविताः सर्वेऽपि गृह्यंते। अथ स्पष्टमेव तेषामिह पाठः कुतो न कृत इति चे
द्वासनापेक्षया जेयत्वन्यतासूचनाय। अत्र पदद्वयं विनापि हृदि श्रिताः कामा यदा मुच्यंत इति वक्तुं शक्यत्वेऽपि वाक्यद्वैविध्य
विरचनं तत्त्वाभ्यासशीलस्याग्रे वासनांतराणामनुदयात्। क्वापि विषये आस्थाया अभावात् पूर्वोक्तकामानां वासनानां वा
आस्थाभावात्तेषां भावोपपत्तेः किमिति वासनाभावे महान् यत्नः क्रियत इत्याशंकापरिहाराय। अयमाशयः पद्यपि तत्त्वाभ्या

सकालेनविषयवासनानवीनाः प्रादुर्भवंतितद्विपरीतसामग्रीसत्वात् परंतु अनेकभवपरंपरासंपादिताः अप्रकटाः सूक्ष्मीभू
तानानाविधानंतभवप्रदा अपरिमिताः नकेवलंतत्वाभ्याससमाहात्म्यादेवनिरुद्धाभवंतीतियत्नरूपाभ्यासेननितेकामाःस्मार्यतेसू
क्ष्मरूपेणानियमेनसंसेवेति। अथपरमिरंपरेतिपरामृष्टकालानंतर्यंबोधयतिएवंचानंतर्यप्रतियोगिकोटौतत्कालेत्यं
शस्यसिद्धत्वात्तद्देशपाठेपिनानुपपत्तिः तथाचकाममोचनकालानंतरमेवमर्त्यः मरणशीलोपिजनस्तत्वाभ्यासपरिपा
कवशात् अमृतः मरणरहितोभवति। अनेनजीवन्मुक्त्यवस्थाप्रतिपादिताभवति। अथमुक्तिसामान्यमेवेहकुतोनप्रति
पाद्यते अमृतोभवतीतिपदयोःसाधारणत्वादितिचेत् सत्यं परंतु तत्रात्रब्रह्मसमश्नुतेइत्यनेनविदेहकैवल्यस्यप्रतिपादनात्
पूर्वममृतइतिपदंसाधारणत्वेपिपुनरुक्तिपरिहारायजीवन्मुक्तिमेवब्रूतेइतिनिर्णीयते। अथवासनानाशोस्तिजी
वन्मुक्तिविदेहकैवल्यमप्याह। अत्रेति जीवन्मुक्त्यनंतरभाविलिङ्गदेहकैवल्यस्यतत्वचक्षुषाममुक्त्योर्द्वयोरपिनिर्देशादिहा
दत्तः कामविनाशानंतरं अत्रतत्वाभ्यासशरीरएवब्रह्म अखंडार्थभूतंसमश्नुतेसम्यक्प्राप्नोतिअपरत्रसम्यक्प्राप्तिरभेदे
नावस्थानंसर्वबाधेसावधारणमितिन्यायेनब्रह्मसमश्नुतेइत्येतावन्मात्रेणानिर्वाहेसंभवति। अत्रेतिपदमधिकंसदवै

वैयर्थ्यकेनेन्लोकांतरादिगमनेऽत्रब्रह्मप्राप्तिरितिकथनंनिराकृतंभवतिकामनाशाभावेतुक्रमेणावैश्वानरादिगमनेपासंगिकेसति
तत्रकामनाशेसतिब्रह्मप्राप्तिर्भवतिचेत्भवतुनामतथाचवासनानाशपर्यंतंसमाध्यनुष्ठानाद्येवश्चितमितिभावः॥अथकाम
मोचनेब्रह्मावाप्तिरितिकाममंत्रेनिरूक्तंकाममुक्तिरेवकरास्पारिस्साकांक्षायामाह॥परेति॥अत्रपरेतिपरस्यप्रभेदचक्रियाच
यिनस्तत्तच्चिधानेपठनीयस्यसर्वाद्यैःपाठःकालस्यसमुत्कर्षद्योतनायप्रभेदनकालोऽत्रएमेवकामनिस्पृहाजीवन्मुक्तिर्नेनुप्र
वेमितिअत्रग्रंथिपरस्यापिप्रथमांतस्यक्रियापातःपूर्वंसर्वंपदानेननिर्दिष्टेशेषंसमुच्चितेऽपितत्रापाठःसर्वेऽपिअन्येषामपिभेदनाच्च
पायम्अन्यचग्रंथ्यतिरिक्ताःकर्मादिलक्षणाःविहेयाःइदानुभूयमानेकाममेऽस्मेस्तुपाज्जेषोऽधितत्वपदार्थेहृदयस्यबुद्धे
ग्रंथ्यपःग्रंथ्यपरत्वसंबंधघटकाःयदाप्रभिधेनेऽप्यतदनंतरकालेइत्यन्वयः॥अथहृदयग्रंथ्यपदइतिसमस्तमेवकुतोनेह
पठितं॥ [illegible] हृदयस्यात्मनासहग्रंथ्योभवेतोसुक्तंग्रंथीनामुभयनिरूपितत्वादुभयसाकांक्षत्वेनैकेनसहसमासःकथंवृ
त्यःपरार्थोत्तरानिरूपिताकांक्षासत्वेनैकैवविशिष्टार्थसंबंधघटनायोग्यारिति [illegible] किंचात्मनासहेतिसंबंधंनत्वोधकं
परमिहनपठितमेवएवंचसमासप्रतिएधकसंभावनापांवृहाख्यंतरात॥किंचानेनहृदयस्यग्रंथ्यपदइत्युक्तेहृदयस्यग्रंथिप्र

क०भा० वृत्तेकृतार्थ्यंयथा तथानेनेतिपदबोधितस्यापि भवेत् इहेत्युक्ते इह परार्थस्य न स्वतः ग्रंथिप्रवर्तकत्वं हृदयस्य स्वभावादेवात्म
८६ नः संबंधप्रतियोगित्वमन्यायत्तं हृदयस्याहजिकं एवं चाविद्यास्वाभाव्यादात्मनि ग्रंथित्वमप्येवं भवति न स्वाभाविकं इति हृ
दयस्यात्मना सहाध्यासेपि न एव संबंधः आत्मानुस्वभावतः शुद्ध एव भवतीति ह्रापितं भवतीत्यपि वेदितव्यं। अत्र प्रभि
द्यंत इत्यत्र प्रेत्सुपसर्गात् पुनर्मृत्योनं यथा न भवति तथा भेदं न घोसते। इहेतिपदं देहे ह्रतानाभ्यासः शंकिपनेनतत्परमेव भ
वतु कर्मभूमिप्रपंचाभवतु इह चेदशकत् इह चेदवेदीदिह सत्यमस्तीत्येव। इह शरीरे आत्मसाक्षात्कारपरिपाकाभावाद्ग्रंथिभेदना
भावेतु ब्रह्मलोकगमनोत्तरं तत्र साक्षात्कारपरिपाकाद्ग्रंथिभेदने सति मुक्तिर्भवति अत एवेहपदगमितब्रह्मलोकगमना
र्थे प्राते चेत्सुक्तरमंत्रे सुषुम्ना नाडी उत्क्रमणमार्गत्वेन ह्रापिता भवति। हृदयस्य ग्रंथ्यपायपदप्रभिद्यंत इत्युक्ते ग्रंथी नामु
भयनिरूपितत्वादेकस्मिन्संबंधिनि हृदये स्वोपाजे सति द्वितीयप्रतिसंबंध्याकांक्षापाजननादाकांक्षितार्थसम
र्पणे तेसंभवत्सनाकांक्षितार्थसमर्पणमन्याय्यमिति। अथ पूर्वं वाङ् मन आदीनां जीवोपकरणानां विलयसंपादनेन समा मा०
धिजनितसाक्षात्काराद्विद्यानिवृत्त्या मुक्तिरित्युक्तेः संप्रतियोगांगभूतवागादींद्रियविलयस्य समाधेरुपस्थानविधेयं प्रथ ८६

रीरं दृश्यन्ते तत्र संजातान्मसाश्राल्काराननुक्तिं दर्शयति शतं चेति। अत्र शतं चैका चेति विधेयस्य प्रथमनिर्देशः एकशत
नाडीनां शरीरे स्थितद्वासप्ततिसहस्रनाड्यपेक्षयापि प्राधान्यं द्योतयितुं। अथ शतमेका चेति शतं चकारेणैवैकेन समु
च्चयसंभवात् प्रथमं चकारो निरर्थक इति चेन्न सत्यं परं तु शतं चेति प्रथमं चकारपाठे शतस्य निरपेक्षप्रतीतिप्रयुक्तप्रा
धान्यमेकस्या अप्राधान्यं चेति शाब्दमर्यादया युधिष्ठिरो धर्ममयो महाद्रुमः स्कंधोऽर्जुनो भीमसेनोऽस्य शाखा माद्रीसु
तौ पुष्पफले समृद्धे मूलं कृष्णो ब्रह्म च ब्राह्मणाश्चेत्यत्र श्रीकृष्णस्यैव प्राधान्यं ब्रह्मब्राह्मणयोरप्राधान्यमितीवात्रापि बोधः
स्यात् तन्माभूत् एकैव प्रधाना शतं त्वप्रधानमिति निरपेक्षत्वप्रयुक्तप्राधान्यप्रतीतिपरिहाराय शतेऽपि चकारः पठितः एवं च
प्रथमं चकारपाठे स्यात् समुच्चयेऽप्याकांक्षायाः समुत्थितत्वात् उत्तरत्रापि नियमेन चकार आहृतः तथा चोभयत्रापि च
कारपाठाच्चकारपाठकृतं प्राधान्यं शतेनापास्येव। अथ शते चकारपाठप्रयुक्तप्राधान्यप्रसक्त्यभावेऽपि प्रथमप्रयुक्त
प्राधान्यं कस्मान्न भवेदिति चेन्न प्रथमपाठस्य संख्याधिकप्रयुक्तत्वेनान्यथासिद्धत्वात्। तासामेकशतनाडीनां मध्ये
मूर्द्धानं ब्रह्मरंध्रमभिउद्दिष्टा एका नाडी शतं चैका चेत्यत्रैका चेति निर्दिष्टा निस्सृतानि गेतामवति। अथ पुषुम्नेमिस्य

क०भा० ८७

ष्टमेवकुतोननिर्दिष्टमितिचेदन्यासामपिनाडीनांविशिष्यनामाग्रहणाद्दैघकयोगाद्दैल्लोकेचातिप्रसिद्धत्वेनसत्वरंत्वातुंपाक्येयंना
डीभवतीतिवेदनीयं।तयासुषुम्नयानाड्याऊर्ध्वंमूर्धानंआयन्योगविधिनाभ्यस्तेनकुंडलिनीद्वियप्राणगणेरायन्तीवेग
छन्तत्रेंद्रियादिवर्गविलयात्समाधिद्वयस्यापिक्रमेणसिध्यासाक्षात्कारोदयेनाविद्यानिवृत्तेरमृतत्वंजीवन्मुक्ति
विदेहकैवल्याभयलक्षणंएतिप्राप्नोतितयाचमूर्द्धस्थानेसर्वेषामिंद्रियाणांविलयःसाक्षात्कारहेतुःसमाधिर्भ
वतीतिभावः।अथवातयासुषुम्नयानाड्याऊर्ध्वमायन्ब्रह्मलोकंगच्छन्अमृतत्वंजीवन्मुक्त्यादिलक्षणंब्रह्मणासहैवसर्वे
संप्राप्तेप्रतिसंचरे।परस्यांतेकृतात्मानःप्रविशंतिपरंपदं।।नकर्मणानप्रजयाधनेनत्यागेनैकेअमृतत्वमानशुः।परेण
नाकंनिहितंगुहायांविभ्राजतेयद्यतयोविशंति।वेदांतविज्ञानसुनिश्चितार्थाःसंन्यासयोगाद्यतयःशुद्धसत्वाः।ते
ब्रह्मलोकेषुपरांतकालेपरामृताःपरिमुच्यंतिसर्वेइतिस्मृतिश्रुतिभ्यामप्युक्तत्वात्।एतीतियोज्यं।अन्याःएवबृहदारण्यकेच
क्षुष्टोवामूर्ध्नोवान्येभ्योवाशरीरदेशेभ्यस्तमुत्क्रामंतंप्राणोनूत्क्रामतिप्राणमनूत्क्रामंतंसर्वेप्राणाअनूत्क्रामंतीति
सुषुम्नायाअन्याश्चनिर्गमनायादानत्वेनविसृष्टप्रसृयमाणाःसंसारगतंभवन्ति।तस्मादयंमंत्रोब्रह्मलोकस्वर्गलोकादिनिर्गमनायादि उप० ८७

नीभूतनाडीपरएवेतिचेत् अत्रोर्ध्वमिति पदस्योपस्थितमूर्द्धपरत्वे संभवत्यनुपस्थितब्रह्मलोकपरत्वकल्पनमनुचितमेव।
मूर्द्धानमभिनिःसृतैकेति नाडीविशेषविधित्वेन मूर्ध्नः स्पष्टं समाम्नानात्। किंच शतं चैका चेति तयोर्ध्वमायन्विष्वङ्ङन्या इति च ए
ष्वकारेण सुषुम्नाया अमृतत्वहेतुत्वं अन्यासामुत्क्रमणहेतुत्वं चेति विभज्य कथनमसंगतमेव भवेत् सुषुम्नाया अपि
नाड्यन्तरवद्देहोत्क्रमणसाधनत्वविवक्षासाम्ये सति च क्षुष्टो वा मूर्ध्नो वेत्यत्रैव शब्दादैरूप्येणानिर्देशौचित्ये सति वैरूप्येण
निर्देशानौचित्यात्। अथ मूर्ध्नो ब्रह्मलोकगमनसाधनत्वात् ब्रह्मलोकाच्च पुनरावृत्त्यभावात् ब्रह्मलोकस्य देवयानमार्गक
त्वाद्देवेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्त इति श्रुतेश्च क्षुरादेः स्वर्गादिलोकगमनसाधनत्वात्तस्य पितृयाणमा
र्गकत्वात् शुक्लकृष्णे गती ह्येते जगतः शाश्वते उभे॥ एकया यात्यनावृत्तिमन्ययावर्तते पुनरिति स्मृतेः फलभेदस्य कथमे
करूपेण निर्देशः स्यादिति चेत्स्यादेव हृदा। एवंच क्षुष्टो वा मूर्ध्नो वान्येभ्यो वा शरीरदेशेभ्य इति फलभेदेऽप्युत्क्रमणसाम्य
मादाय निर्देशसाम्यदर्शनात्। प्रकृते चोत्क्रमणाकृतसाम्येनाप्येवेति मनसि निधायैव निर्देशवैषम्यं समादृतमपीति स्वीकर
णीयत्वात्। तस्मात्समाधिपर एवायं मन्त्र इत्येवं निर्णीयं। अन्याः सुषुम्नातिरिक्ता नाड्यः प्राणसंचारिकाः विष्वग्गतास्तन्नाडु

क्रमणोत्क्रांत रमात्मस्वरूपमपहाय बहिर्निर्गमने बहिर्निर्गमनं च विषयग्रहणाय लोकांतरगमनोपवेसन्वेदेतत् अनेनात्मा
सामुत्क्रमणसाधनत्वनिर्देशबलेन सुषुम्नाया स्तद्वपरीत्यसूचनेनेहायं मंत्रः साक्षात्कारसाधनीभूतसमाधिपर इति
प्रकटीकृतं भवति। अथ च श्रुत्या वा मूर्ध्नो वेति बृहदारण्यके मूर्ध्नः उत्क्रमणसाधनत्वश्रवणात् इहोत्क्रमणसाधनत्वा
भावसूचनमसंगतमिति चेत् सत्यं परंतु सुषुम्नादिरूपा भवति उत्क्रमणसाधनीभूता न तद्विपरीता चेति पंचाग्निविद्याशां
डिल्यविद्यादहरविद्यादिसंवलिता च उत्क्रमणसाधनीभूता भवति समाधिसंभूताखंडार्थसाक्षात्कारसंवलिता चेत्त
त्रैवमुक्तिहेतुत्वात् उत्क्रमणसाधनीभूता न भवत्येव प्रकृते तु पूर्वमंत्रे अत्र ब्रह्म समश्नुत इति निर्गमनाभावश्रवणात्।
की एवमांध्रादन्ययोर्बृहदारण्यके तथैव विवरणात् उत्तरमंत्रे च तं विद्याच्छुक्रममृतमिति ज्ञाननिर्देशात् तत्संदर्भोपठिते
शतमित्यस्मिन् मंत्रे परिगृहीते यं सुषुम्नानाडी विदेहजीवन्मुक्तिहेतुभूतसाक्षात्कारसंवलितानोपासनादिसंवलितेति निर्णी
यते एवं च साक्षात्कारसाधनीभूतसमाधिविशिष्टत्वेन नाडी यं सुषुम्नाख्योत्क्रमणसाधनत्वाभावं वक्ष्येव भवितुमर्हतीत
था च नकाप्यनुपपत्तिरितिभावः। अथ पूर्वं वे प्राणोपासनाप्रस्तावात्तस्य ब्रह्मलोकसाधनत्वात् तदुपमनेम्मा गकथ्यनप

रोयमंत्रो भवत्विति चेत् एतदालंबनं त्वाताला ब्रह्मलोके महीपते इसंतेन ग्रंथेन पूर्वमेव तत्प्रकरणसमापनेन तदनंतरं सुंदरब्र
ह्मविद्या एव सर्वेषु भूतेषु न संदर्शयति इति रूपमिसंतेन समाप्य यच्छेद्वाङ् मनसीयद्रा पंचावतिष्ठते इ सादिनास मारभ्य योगम
करते विद्यामेतां योगविधिं च कृत्स्नमिति मंत्रेणोपदिष्टे हिते। श्रवणादोपासनाशेषभूतमार्गप्रदर्शनमसंगतमेव अस्थानस
न्निवेशदोषापत्तेरिति दिक्। अथ तयोर्द्वमायन्नित्यत्र मुक्तिनिर्देशासामर्थ्यात् केवलजीवतत्त्वज्ञानान्मुक्तेरभावात्सोध्वन इति
तृतीयवल्यामेतस्य षष्ठवल्ल्यां विद्यायां माणायामखंडार्थस्य विस्पष्टत्वात् खंडार्थे साक्षात्कारस्य च नेन साक्षात्कारात् पूर्वं भावि
वेदनेन स्वितं भवति तथा च नेह द्वन्द्वप्रकारं स्व च यत्प्रकरणार्थमुपसंहरति अंगुष्ठेति। पूर्वार्द्धे जीवपरं चतुर्थवल्यामो षड्डे रे
नुगतं तं जीवं स्वात् शरीरात् संचकोशालक्षणात् प्रवृहेद्धिभजेत् धैर्येणास्थैर्येण इषीकां मुंजादिवेत्यनेन प्रकृत्यधर्ममण
मेनन्यविदितो यवलीमेत्रार्थोप्यप्रकृत्यपदस्य समभिव्याहारबलेन संगृहीतो भवति। तमेतं जीवं शुक्रममृतं शोधितं तस्य दार्थ्येख
रूपं जानीयादिति समन्वयः। अत्र जनानामिति बहुवचननिर्देशो नत्वपरार्थत्वावच्छिन्नपरिग्रहाय उद्देशेन तस्य दार्थ्यविधा
नान्महाखंडार्थो निरंकुशः सिद्धो भवति अंगुष्ठमात्रः पुरुषोंतरात्मेत्येकवचनोपादानादुपाधिभेदेनैव जीवनानात्वं वस्तुन

च्छैतन्यमेकमेव सकलजीवावच्छेदेनेति सूचितं भवति। अनेन शोधितजीवस्वरूपं प्रकाशितं। तमिसस्य द्वितीयांतस्य क्रियाशरीरे
समभ्यर्हितस्य क्रियासमीपे पठनाद्दस्यापि सर्वादेः पाठः सर्वनामत्वात्। पूर्वनिर्दिष्टशाख्यवधानेन प्रतिनिर्देशकं निर्दिष्टस्य मि
तिन्यायात्। अथ द्वितीयो गुरुर्नचिकेतोवृत्तं सफलं दर्शयन् प्रकृतं ग्रंथं ससंग्रहेणातासर्यं चस्त्य चयन्ननचिकेतोऽभि
नन्ननेष्वपि नचिकेतः समानवन्नवस्तुविधियं यमोपदिष्टा साधारत्वे नभवत्ता भवतीति द्योतनाय फलं सेसाधनमति
दिशति मृत्युप्रोक्तामिति नचिकेतः नचिकेतपदं निर्दिष्टसामर्थ्यात्मकारान्तं वकारांतमपि भवतीत्यभिप्रेत्य। अथवान
चिकेता इति दैर्घ्यस्याभावश्छांदसः। नचिकेतः नचिकेता इत्यर्थः। मृत्युप्रोक्तां एतां परिदृश्यमानां विद्यां ब्रह्मविद्यां कृत्स्नं
योगविधिं च यावत् यमेन योगविधिरुपदिष्टस्तावन्तमपि योगविधिं च अथ यमसमेलनानन्तरं लब्ध्वा प्राप्य तत्तुष्टा
न्माहात्म्यात्साक्षात्करणेदये सति विरजः सन् अत्र रजपदं तमपदं नरकाणां तं विरजा इति दैर्घ्याभावश्छांदसो वा
विगतरजोऽविद्यालक्षणं यस्मात्स विरजाः सन् निरविद्यः सन्नित्यर्थः। अत एव साक्षात्कारविध्वस्ताविद्यत्वादेव ब्र राम॰ ८९
ह्मप्राप्तिश्रमनिरसनेन ब्रह्मशोधिततत्पदार्थस्वरूपं शोधितत्वंपदार्थात्मना प्राप्तः लब्धवान् सन् जीवन्मुक्तिमुप

क॰भा॰
९०

संभावितनिखिलदोषोपशमनाय दृष्टं भगवत्प्रार्थनारूपं यजुर्मंत्रं द्वितीयगुरुशिष्यवर्गानुद्दिश्य ततीयोगुरुः स्वशिष्या
नुप्रतिविवरीतुं। पठतिस्म सहेति विद्याविषयः परमेश्वरः नौ आवां अवतु पालयतु विद्याग्रहणसाधनादिकार्येषु रोगा
दिविघ्ननिवारणेन रक्षतु नौ आवां गुरुशिष्यौ सह भुनक्तु एकदेशे भोजनं विद्यानुकूलतया कारयतु एवं च सति
आवां वीर्यं विद्याविषये बलं मननजन्यदृढ्यासनाद्यनुकूलं करवावहै निष्पादयावहै हे प्रणवगम्य शनो आव
योर्गुरुशिष्ययोरधीतमध्ययनं तेजस्वि तेजोयुक्तं वीर्यवदस्तु भवतु आवां मा विद्विषावहै द्वेषं मा करवावहै शांतिः
शमनं भवत्विति शेषः अत्र शांतिरिति त्रिः पाठः आध्यात्मिकाधिभौतिकाधिदैविकदोषत्रयोपशमनार्थः।त
तीयोगुरुर्व्याचष्टे इत्योमिति इति सहेत्यादिना प्रार्थ्यमानः ओं प्रणवगम्यः परमात्मेत्यर्थः॥ इति श्रीमत्परमहंसपरि
व्राजकाभिधनवद्विद्याचार्यस्वयंप्रकाशपादशिष्यतिनपरेशाबालकृष्णानंदसरस्वतीविरचिते कठवल्लीविवरणे

राम॰
९०

तत्र सर्वनामपदं वदन्न भिमन ... नन्तर्य्यबोधकत्वेऽप्यपादप्रयोगात्। प्रकृते तत्सद्भावात् किंतु योग्यतयाऽनन्तर्यप्रतियोगीयमनचिकेतः सं ९ प॰

लब्धवान् स नपश्चात् विमृत्युः विगतो मृत्युर्मरणमुपलक्षणमेतज्जन्मादेः ईदृशः जन्ममरणादिक्लेशरहितः विदेहकैव
ल्यमुक्तः अभूत् अन्योपि नचिकेतसोऽन्योऽपि जनः एवं नचिकेतोवदेव जीवन्मुक्तिं विदेहकैवल्यभाग्भवेदिति शेषः न
केवलं नचिकेतो भिन्नजनानां विनाचजन्ममुक्तिर्भवति किंतु विद्यारूपं पदमपेक्षितं तन्नान्यः पंथा विद्यतेऽयनायेति श्रुतेत
गादिसादृश्यरूतिः यो जनः अध्यात्ममेवात्मन्येव विद्भवति ज्ञाता भवति विजातीयप्रत्ययतिरस्कारेण सजातीयात्मप्रत्य
यवान् भवति प्रपंचपरिहारेण केवलात्मज्ञो भवतीति यावत्। अत्र नचिकेत इति प्रथमांतस्य सर्वादौ पठनीयस्य त
त्रापाठो विधेयेन नचिकेतोमात्रोद्देश्यका किंलधिकारिमात्रोद्देश्यिका नचिकेतास्तु विद्याप्रवर्त्तक इत्येतावानेव विशे
ष इति सूचनाय। अत एवान्योप्येवमिति निर्देशः संगतो भवति। उत्तरवाक्ये पञ्चदशसन्ति। तत्र दृश्यवाक्येन नियमतो नापेक्षि
तेनाम्य त्वादि सन्योप्येवमिति एवं चैवाक्ये तत्पदं न पठितं। अथातो धर्मजिज्ञासा अथातो ब्रह्मजिज्ञासा। दोषसर्वत्रापि वामा
दावेवाथपदनिर्देशादिहमध्येऽथपदपठनं किं निबंधनमिति चेत्। अथ नचिकेतो यमाभ्यां विद्यायहणादानयोः प्रमादकृत
द्विं॰ गम्य एवेति सूचनाय मध्ये निवेशः यथा॥ अपि चैवं प्रतिष्ठा पुरणीत्कार्यद्व्याकुलः॥ गुरुकाव्यानुगां बिभ्रच्चान्द्रीमभिनभः श्रि
यं॥ सार्धमुरुवसीरिप्पामयासावासरत्नदः॥ अत्राप्यथपदेन मध्यपठितेन व्यवहितव्याकुलतानंतर्ययोग्यतया निर्णीयते। न चाग्नि
विद्यादिलक्षेसग्रंतस्याः कल्पनीयत्वात्॥ ५